वर्षम् 72
अङ्कः -02
मार्गशीर्षमासः
विक्रमाब्दः 2078
युगाब्दः 5123
दिसम्बर , 2021


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | दीपावली | सांवरमल शास्त्री | ५ |
| ३ | पुराणेषु वायुपुराणं तस्य वैशिष्ट्यञ्च | डॉ. गीता शुक्ला | ६ |
| ४ | काश्मीरोदयमिति ऐतिहासिकखण्डकाव्ये काश्मीरपरिचयः | हेमराजः | ८ |
| ५ | वेदेषु प्रतिपादितानि जीवनमूल्यानि | डॉ. योगिनी हिमांशु व्यासः | १८ |
| ६ | छन्दोबद्धगज़लकाव्यस्तबकः | डॉ. हर्षदेवमाधवः | २१ |
| ७ | पाणिनीयशिक्षानुसारं ध्वनिप्रक्रियाज्ञानम् | डॉ.जगदीशप्रसादजाटः | २२ |
| ८ | अथ सेवा-समाचारो धर्मस्य संस्कृतस्य च | पं. नथमलशास्त्री दाधीचः | २४ |
| ९ | पुस्तक-समीक्षा | महामहोपाध्याय देवर्षि कलानाथ शास्त्री | २५ |
| १० | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| ११ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
महन्तः प्रतापपुरी
( तारातरामठं, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 72 अङ्कः -02
मार्गशीर्षमासः
विक्रमाब्दः 2078
युगाब्दः 5123
दिसम्बर, 2021

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# हिन्दुत्वाभिसम्बन्धात्तु हिन्दुः

...✍ प्रोफेसर श्रीकृष्णशर्मा

इदानीं प्राकरणिकं विवादपदवीं गतं 'हिन्दु-हिन्दुत्वयोर्भेदः' इति विषयं शास्त्ररीत्या विवेचयामः। नवम्बरमास एव 'कांग्रेस' राजनीतिकदलस्य कश्चन कांग्रेस-राजनेता 'सलमान खुर्शीद' इत्यभिधोऽयोध्या-सम्बन्धि स्वप्रणीतपुस्तकं परिचायितवान्, यत्र प्रसङ्गवशात् स्वविचारान् प्रकटितवान् यद् हिन्दु-हिन्दुत्वयोर्भेदोऽस्ति। हिन्दुर्मम स्वीकार्यः, न तु हिन्दुत्वम्। हिन्दुत्वस्य तुलनापि 'बोको हरम' तथा इस्लामी-राज्य सदृशातङ्कवादिसंघटनैः सह विहिता। सर्वमेतत्-समाचारपत्रैरवगतम्।

अत्रायमभिसन्धिः। सनातनधर्मः, वैदिकधर्मः, आर्यधर्मः-एतेऽपरपर्यायाः। आर्यधर्मस्यैवाङ्गभूता जैन-बौद्ध-सिक्खप्रभृतयोऽवान्तरधर्माः समुद्भूताः। सर्वेष्वेषु धर्मेषु 'पुनर्जन्म' 'मोक्ष' इत्यनयोः सममवधारणा। अतश्चैते भारतोद्भूतत्वाद् 'भारतीय धर्माः' कथयितुं पार्यन्ते। 'मुस्लिम' 'पारसी' 'ईसाई' 'यहूदी' प्रभृतयो धर्मा भारतोद्भूताः न सन्ति, तथापि भारतवर्षे चिरकालाद् भ्रातृतुल्या निवसन्ति, स्वां स्वामुपासना-पद्धतिञ्च गौरवेणाङ्गीकुर्वन्ति। न तत्र काचिद्विप्रतिपत्तिः केषामपि। इदमेव सनातनधर्मस्य सहिष्णुत्वम्।

आर्यधर्म एव कालान्तरे 'हिन्दुधर्म' इति नाम्ना प्रथितः। वस्तुतः काँश्चन जीवनमूल्यविशेषान् आश्रित्य या जीवनपद्धतिः, सैव 'हिन्दुधर्म' नाम्ना प्रसिद्धः, न तु सनातनधर्मतो भिन्नः। कानि ते जीवनमूल्यानि?

उच्यते -

**'धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या-सत्यमक्रोधो दशकं धर्मलक्षणम्।।'**

**- मनुस्मृतिः, 6.92**

**'अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहाः यमाः'**

**- योगसूत्रम्, 2.30**

**'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'**

**- वैशेषिकसूत्रम्, 1.1.2**

**'धर्मं शनैः सञ्चिनुयाद् वल्मीकमिव पुत्तिकाः।'**
**परलोकसहायार्थं सर्वभूतान्यपीडयन्।।**

**- मनुस्मृतिः, 4/238**

**'दुष्टस्य दण्डः सुजनस्य पूजा न्यायेन**
**कोशेन च सम्प्रवृद्धिः।**
**'अपक्षपातोऽर्थिषु राष्ट्ररक्षा**
**पञ्चैव यज्ञाः कथिता नृपाणाम्।।'**

**- अत्रिसंहिता, धर्मोपदेशवर्णनम्, 28**

निदर्शनमात्रमेतद् हिन्दुजीवनपद्धतेः। वस्तुतोऽक्षयभण्डारः। मानवजीवनस्य नैतिकमूल्यानि हिन्दुत्वस्य सुदृढं पृष्ठास्थि (Back-bone)। एतद्विना मानवजीवनं निरर्थकम्। एतद् अनवबुध्य ये निन्दन्ति हिन्दुत्वम् तदविदितविजृम्भणमात्रमिदम्। 'मुखम् अस्तीति वक्तव्यम्' इत्येव तेषां लक्ष्यम्। अत्रैव शास्त्रीयं पक्षमपि प्रस्तुमः। काव्यशास्त्रीयग्रन्थे **काव्यप्रकाशे** साक्षात्-संकेतितार्थाभिधायकवाचकशब्दस्य संकेतग्रहः कुत्र भवतीति जिज्ञासायां **'संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा'** (2.28) इत्येवं सूत्रयति मम्मटाचार्यः। व्यक्तेरुपाधौ जाति-गुण-क्रिया-सञ्ज्ञार्थेषु शब्दानां प्रवृत्तिर्भव-तीत्याशयः। अत्रेदमाकूतम्। स्फटिके जपाकुसुमवत् यो व्यक्तौ स्वधर्मम् अभिधां सङ्क्रामति स व्यक्त्युपाधिः। स च द्विविधः। वस्तुधर्मो वक्तृयदृच्छा सन्निवेशितश्च। वस्तुधर्मोऽपि द्विविधः-सिद्धः साध्यश्च।

साध्य: क्रियारूप:। सिद्ध: पुनर्द्विधा-पदार्थस्य प्राणप्रद:, विशेषाधानहेतुश्च। तत्र विशेषाधानहेतुत्वं गुणस्वरूपम्। **प्राणप्रदत्वञ्च** यावद्वस्तुस्थितिसम्बन्धित्वम्। तच्च जातिरूपमेव। जातिरूप: शब्दार्थ एव व्यवहार-योग्यतात्मकं प्राणं प्रददातीत्यत: '**प्राणप्रद**' इत्युच्यते। अत एवोक्तम् **आचार्यभर्तृहरिणा**-

'**नहि स्वरूपेण गौ:, नापि अगौ:, गोत्वाभिसम्बन्धात् तु गौ:**' इति। स्वरूपमात्रेण 'गौ:' इति व्यवहार: कर्तुं न पार्यते, नापि गोभिन्न: (अगौ:) इत्यपि, किन्तु 'गोत्व' जातिवत्तयाऽवबोधादेव 'गौ:' इत्येवं 'गो' शब्द: व्यवहारविषयो भवतीत्याशय:। जातिश्च 'नित्यत्वे सति अनेकसमवेतत्वम्' इति सर्वगवादिव्यक्तिवृत्ति:।इदमुपलक्षणम्।

एवमेव स्वरूपत: सर्वे मानवा: समानाङ्गत्वात् समाना एव। हिन्दुरपि अन्यधर्मावलम्बिमानवसदृशो भाति। किन्तु पूर्वोक्तनैतिकमूल्यसमुपेतहिन्दुत्व जाति-वैशिष्ट्यादेव हिन्दुर्भवति। हिन्दुत्वं हिन्दूनाम् प्राणप्रदो धर्म:, यं विना हिन्दुरेव न परिचीयते। अतो **हिन्दुत्वं हिन्दूनाम् अपरिहार्यं प्राणप्रदो धर्म:**। यथा वा मनुष्यत्वं (मानवता) धर्मं विना मनुष्यो न भवति, तत्र 'मनुष्य-मनुष्यत्वयोर्भेद:' अविवेकस्य परिचायक एव। सर्वत्रैषा सरणिर्विज्ञेया। अज्ञानमूलका येऽन्यथा प्रलपन्ति ते के न जानीमहे।

**व्याकरणपीठाध्यक्षचर:, जगद्गुरु-रामानन्दाचार्य-**
**राजथान-संस्कृत-विश्वविद्यालय:,जयपुरम्**
**दूरभाषाङ्का: 8386943655**

# दीपावली

❑ सांवरमल शास्त्री

(1)

विजित्य रावणं राम:, यदाऽयोध्यां समागमत्।
दीपावल्यास्तदा पर्व, सम्पद्यते सदा ध्रुवम्।।

(2)

ब्रह्मविष्णुशिवादीनां, रूपं वेदस्य कारणम्।
अग्नेश्चन्द्रमसो भानो:, हेतुं रामं नमाम्यहम्।।

(3)

निरुपमं गुणातीतं, गुणानाञ्च निधिं तथा।
प्राणं वेदसमूहस्य, दाशरथिं वयं नुम:।।

(4)

जीवनं नास्ति पर्याप्तं, रामज्ञानं हि विस्तृतम्।
एको गुणो हि रामस्य, दीप: भवति सर्वदा।।

(5)

रामस्य जन्मन: पूर्वं, भविष्यवाक् समागता।
तच्छ्रुत्वा विबुधा: सर्वे, बभूवु: विस्मयान्विता:।।

भविष्यवाणी

(6)

दिनस्य प्रथमे भागे, यदि रामो जनिष्यते।
अमन्दानन्दसन्दोह:, वर्षिष्यते निरन्तरम्।।

(7)

विश्वस्य वैभवं कीर्ति:, सम्पद् राज्यं यश: सुखम्।
निपतिष्यति तत्पादे, सन्देहो नास्ति कुत्रचित्।।

(8)

द्वितीयभागमाश्रित्य यदि राम: प्रजायते।
यावज्जीवति लोकेऽस्मिन्, कष्टमेव सहिष्यते।।

- कालाडेरा

# पुराणेषु वायुपुराणं तस्य वैशिष्ट्यञ्च

❑ डॉ. गीता शुक्ला

पुराणेषु भारतीयसंस्कृतेः मौलिकानां सिद्धान्तानां स्पष्टमुल्लेखो विद्यते। वेदस्य च विश्वजनीनानां विषयाणां साङ्गोपाङ्गं विवेचनम् उपलभ्यते। वक्तुं शक्यते यत् भारतीयसंस्कृतेः रूपरेखा पुराणेष्वेव सुरक्षिता वर्तते। पुराणेषु मानवजीवनस्य जीवितोऽभिमानः विद्यते। पुराणानि अस्माकं लौकिक्याः पारलौकिक्याश्च समुन्नतेः साधनानि सन्ति।

पुराणानां प्रमुखं प्रयोजनं वेदविहितार्थानां जनसाधारणेषु प्रचारो विद्यते। पुराणेषु सामान्यजनानां हृदयङ्गमसम्पादनवैशिष्ट्यम् अस्ति।

**'पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।'**

(क) पद्मपुराणे-सृष्टिखण्डे 1/45

(ख) स्कन्दपुराणे-रेवाखण्डे 30 1/24

**'पुराणमखिलं तात सर्वशास्त्रमयं स्मृतम्'।** स्कन्द. 7/1-24

पुराणानां विकासक्रमे विशेषरूपेण द्वे धारे लक्षिते भवतः। एका व्यासपूर्वधारा द्वितीया च व्यासोत्तरधारा। यथा व्यासात् पूर्वं वेद एक एव आसीत् तथैव पुराणमपि एकमेव आसीत् यस्मिन् शतकोटिः श्लोकाः आसन्, पश्चाद् भगवता व्यासेन तेषाम् अभिप्रायान् चतुर्लक्षश्लोकेषु सङ्कलय्य अष्टादशभागेषु विभज्य अष्टादशनामानि कृतानि, यानि अद्यत्वे प्रचलितानि अष्टादशपुराणानि प्रोच्यन्ते। यस्य सङ्केतोऽस्माभिः विभिन्नेषु पुराणेषु प्राप्यते।

वायुपुराणं प्राचीनकालादेव जीवितं साहित्यमेव पुराणं मनुते। - वायुपुराणे 105/9-10

पुराणेषु प्रायः प्रमुखरूपेण द्विप्रकारको गणनाक्रम उपलभ्यते- 1. सृष्टिप्रक्रियाप्रतिपादको विशिष्टक्रमः 2. वर्णसाम्यक्रमः।

यस्मिन् पुराणे वायुना धर्मकथायाः रुद्रमाहात्म्यस्य च वर्णनं विहितमस्ति तदेव 'वायुपुराणम्' अस्ति।

**'श्वेतप्रकल्पप्रसङ्गेन ................ रुद्रमाहात्म्यसंयुतम्'** इति मत्स्यपुराणे श्वेतकल्पप्रसङ्गे उक्तम्। पुराणेऽस्मिन् चतुर्विंशतिसहस्रात्मिका श्लोक संख्या विद्यते-

**चतुर्विंशतिसाहस्त्रं पुराणं तदिहोच्यते।** मत्स्यपुराणे 53/18

नारदीयपुराणेऽपि एवमेव उल्लेखो वर्तते।

रेवामाहात्म्ये वायुपुराणस्य परिचये चतुर्थं पुराणम् उक्तम्। श्लोकसंख्या सैव उक्ता।

**पुराणं यन्मयोक्तं हि चतुर्थं वायु-संज्ञितम्।** रेवामाहात्म्ये 27/2

वायुपुराणे प्रोक्तम् यत् चतुर्थं महापुराणं लोककल्याणार्थं वायुप्रोक्तत्वाद् वायुपुराणनाम्ना प्रसिद्धमस्ति।

इदं चतुर्षु पादेषु विभक्तम्-

1. **प्रक्रियापादः** (1-6) 2. **उपोद्घातपादः** (65-99)

3. **अनुषङ्गपादः** (7-64)

4. **उपसंहारपादश्च** (100-112)

**प्रक्रिया प्रथमः पादः कथावस्तुपरिग्रहः।**
**अनुषङ्गः उपोद्घात उपसंहार एव च।।**
**एवमेव चतुष्पादं पुराणं लोकविश्रुतम्।**
**उवाच भगवान् साक्षात् वायुर्लोकहिते रतः।।**

वायुपुराणे 103/44-45

चतुर्ण्णां पादानां तुलना चतुर्भिर्वेदैश्च सह कृताऽस्ति। एषु चतुर्षु पादेषु श्लोकसंख्या द्वादशसहस्रपरिमिता वर्तते। रचना प्राचीना शैली च समीचीना विद्यते। वायुपुराणे पुराणपञ्चलक्षणसमन्वयः स्पष्टतया जायते-

सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितानां द्वापरे वायुपुराण-मेव महापुराणं मन्यते।

महाभारते ऋषिभिः संस्तुतस्य वायुपुराणस्य स्पष्टमुल्लेखो विद्यते यत्र भूतभविष्यच्चरितानां चर्चा कृता-

**एतत् सर्वमाख्यातमतीतानागतं मया।**

**वायुप्रोक्तमनुसृत्य पुराणमृषिसत्तम।।** महाभारतस्य वनपर्वणि 191/16

महाकविना बाणभट्टेन स्वकीये हर्षचरिते कादम्बर्यां च वायुपुराणस्य चर्चा कृता।

अथ वायुपुराणस्य वैशिष्ट्यं निरूप्यते-

यद्यपि वायुपुराणे चतुर्थमहापुराणस्य सर्वाणि लक्षणानि न सर्वथा सङ्गतानि तथापि अधिकांशस्य सङ्गतिस्तु जायत एव।

- वायुपुराणं तान्त्रिकप्रभावरहितम्
- सम्प्रदायसङ्कीर्णतावर्जितम्
- शिवपुराणात् प्राचीनम्
- वायुपुराणे **राजवंशावली** विस्तृतरूपेण विद्यते। स्थले-स्थले राज्ञाम् ऋषीणाम् राजवंशावल्याः वंशानुचरितस्य च स्पष्टतरोल्लेखो विद्यते। राजवंशनि-रूपणप्रसंगे गुप्त साम्राज्यस्य आरम्भिकसीमाया उल्लेखो वर्तते-
- धर्मशास्त्रीयविषयाणां बाहुल्यं विद्यते। वायु. 99/383
- वायुपुराणं भारतीयजीवनस्य संस्कृतेश्च मूला-धारोऽस्ति।
- भावुकताया अपेक्षया तर्कस्य प्रचुरं प्राधान्यं विद्यते।
- वर्णनशैल्यां वेदकालतः बौद्धकालपर्यन्तं भारतीय-राजनीतिकस्योत्कर्षस्य गौरवपूर्णम् उल्लासो विहितोऽस्ति।

वायुपुराणे विकासवादः अन्यतमा विशिष्टता वर्तते-

भारतीयसंस्कृतेः विकासस्य विषये वायुपुराणम् अपि आधुनिकानाम् इव स्वकीयं तर्कसंगतं मतम् उपस्थापयति।

वायुपुराणानुसारं मनुष्याः प्रथमं वनवासिनः आसन्। तदनन्तरं तैः ग्रामीणं नागरिकं च जीवनम् आरब्धम्। सर्वप्रथमं ते पशुवत् शीतोष्णसहनशीला आसन् किन्तु कालान्तरे तेषां बुद्धेर्विकासो जातः। तदनु ते शीतोष्णाभ्यामात्मनो रक्षितुम् उपायं विचिन्त्य शनैः-शनैः स्वाङ्गच्छदनाय शरीररक्षायै च वस्त्राणाम् आविष्कारं कृतवन्तः। पूर्वं ते निर्मातुं न जानन्ति स्म। गृहहीनाः सन्तो वृक्षाणामधस्तले गिरिगुहासु च निवसन्तः स्वेच्छया आहारं विहारं च कुर्वन्तः समयं यापयन्ति स्म। प्रथमं ते लघुगृहं पर्वतेषु नदनदीतटेषु निर्मातुमारब्धवन्तः यत्र तेषां प्राकृतिकी सुखसामग्री समुपलब्धा आसीत्। पश्चात् ते शनैः शनैः ग्रामपुरनगरादिनिर्माणे समर्था अभवन्।

प्राचीनकालेऽस्य पुराणस्य महती प्रतिष्ठा आसीत्। य एतत्पुराणनिरुक्तितात्पर्यं वेत्ति स समस्तपापेभ्यो विमुक्तो भवति। यश्चेदं श्रेष्ठतरं पुराणं श्रुत्वा धर्मे प्रवर्तते स स्वस्थशरीरस्य रोमकूपसंख्याककोटिवर्षाणि स्वर्गे आनन्दमनुभवति। इदं पुराणं यशोदायकं सर्वपापहरं पुण्यप्रदं च अस्ति।

**यस्मात् पुरा ह्यनतीदं पुराणं तेन चोच्यते।**

**निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते।।**

**सह आचार्य एवं संस्कृतविभागाध्यक्षा,**

**बी.ए.के. स्नातकोत्तरमहाविद्यालयः,**

**लखीमपुर खीरी ( उत्तरप्रदेशः )-262701**

**दूरभाष: 9452946261**

# काश्मीरोदयमिति ऐतिहासिकखण्डकाव्ये काश्मीरपरिचयः

❑ हेमराजः

संस्कृतसाहित्ये बहवः ऐतिहासिकाः ग्रन्थाः विलिखिताः सन्ति। यथा कल्हणकृतराजतरङ्गिणी, नीलमुनेः नीलमतपुराणम्, जोनराजकृतराजतरङ्गिणी, आचार्यपण्डितमार्तण्डहनुमत्प्रसादशास्त्रीकृतकाश्मीरेतिहासादयः सन्ति। अस्मिन् क्रमे केन्द्रीयसंस्कृत-विश्वविद्यालयस्य पुरीस्थश्रीसदाशिवपरिसरे साहित्य-विभागाध्यक्षः इति पदमलंकुर्वाणः डॉ. सूर्यमणिरथ-महोदयेन **'काश्मीरोदयम्'** ऐतिहासिकं खण्डकाव्यं विरचितम्। डॉ.रथमहोदयाः केन्द्रीयसंस्कृतविश्व-विद्यालयस्य जगन्नाथपुरीस्थ-श्रीसदाशिवपरिसरे साहित्यविभागे विभागाध्यक्षरूपेण कार्यं कुर्वन्ति स्म। विभागस्यादेशेन डॉ. रथमहोदयानां स्थानान्तरणं श्रीजगन्नाथपुरीस्थश्रीसदाशिवपरिसरात् जम्मूकाश्मीर-प्रान्तस्य श्रीरणवीरपरिसरं प्रति अभवत्। विभागस्य निर्दिष्टसमये रथमहोदयाः २६/०६/२०२१ दिनाङ्के जम्मूनगरं समागताः। डॉ. रथमहोदयाः अध्यापनकर्मणि कुशला आसन्। ते स्वाध्याये सर्वदा संलग्नाः भवन्ति स्म। तेषां काश्मीरस्येतिहासपठने विशिष्टा रुचिः आसीत्। डॉ. रथमहोदयेन कल्हणकृतराजतरङ्गिणी नीलमुनेः नीलमतपुराणम् पण्डित-हनुमत्प्रसादशास्त्री-महोदयस्य काश्मीरेतिहासः विशिष्टरूपेण पठितः। तदनन्तरं तेषां प्रबलेच्छा सञ्जाता यत् अहं पद्यमयं काव्यं रचयामि। तस्य परिणामस्वरूपं डॉ. रथमहोदयेन 'काश्मीरोदयम्' इति ऐतिहासिकं खण्डकाव्यस्य रचना कृता। काश्मीरे प्रथमः **राजा गोनन्दः** आसीत्। अधुना श्रीमान् **कर्णसिंहः** काश्मीरराजरूपेण अस्ति। काश्मीरोदयम् इति ऐतिहासिकं खण्डकाव्यमस्ति। एतस्य प्रारम्भः देवराजेन्द्रस्य नन्दनवने प्रचलन्त्या सभया भवति। काश्मीरोदयम् इति ऐतिहासिक-खण्डकाव्यस्य द्वौ भागौ स्तः तौ १. निशा-उदयः, 2. प्रातरुदयः नामाख्यातौ स्तः।

**प्रथमखण्डः ( निशा-उदयः ) -**

अस्मिन् खण्डे गोनन्दः, दामोदरः, शनीचरः, अशोकः, जलौकाः, तुञ्जीनः, कनिष्कः मातृगुप्तः, प्रवरसेनः, जयापीडः, अवन्तिवर्मा, शङ्करवर्मा, पङ्कः, यशस्करः, अनन्तः, कलशः, हर्षः, उच्चलः, दिद्दा, रड्डः, सह्लणः, सुस्सलः, भिक्षाचरः, सुस्सलः द्वितीयः, कोटादेवी इति पञ्चविंशतिः राजानः। अपि च षट्त्रिंशन्मुसल्मान्पठान राजसु शाहमीरः, हसनखानः, फतेहशाहः, महामदः, नजुक्खानः, दौलतखानः, अल्लीखानः, युसुफखानः, याकूब्खानः, शेखफरीदः, रामदासः (मुसलमान-शासकाधीनः कश्चिद् हिन्दू अथवा हिन्दुनामधारी कश्चित् मुसलमानशासकः) आह्लादखानः, महमदकुलीनखानः, महमदुरानी, इति चतुर्दश राजानः वर्णिताः सन्ति। रात्रौ अन्धकारः भवति तस्मिन् अन्धकारे यदा मध्ये चन्द्रमसः प्रकाशः भवति स्म, सः प्रकाशः जनानां कृते आनन्ददायकः भवति। तथैव एतेषु षट्त्रिंशत्सु शासकेषु केचन उत्तमाः प्रजापालकाः हितकारकाश्च आसन् केचन प्रजाविरोधिन आसन्। तेषां शासनकाले प्रजाजनाः

पीडिता: दु:खिता आसन्। तदा जनानां जीवनमन्धकारमयमेवासीत्। परञ्च मध्ये-मध्ये शशिन: चन्द्रिकागमनात् प्रजाया: जीवनं किञ्चित् सुखमयमासीत्। अत: एष: काल: 'निशा-उदय:' इति नाम्नोल्लिखित: वर्तते।

**द्वितीयखण्ड: ( प्रातरुदय: )**

इत: पूर्वं कश्मीरराज्ये यवनानामाधिपत्यमेवासीत् तस्य वर्णनमत्र निशा-उदय: इति नाम्ना अभवत्। काश्मीरे शाहशूजान्तिम: पठानराजा आसीत्। तं पराजित्य शिखसम्राट्महाराजारणजित्सिंह: १८१९ ख्रीष्टाब्दे काश्मीरराज्यं स्वाधीनं कृतवान्। तदनन्तरं गुलाबसिंह:, रणवीरसिंह:, प्रतापसिंह:, हरिसिंह:, कर्णसिंह:, काश्मीरे राजान: जाता:। महाराजा रणजित्सिंहादारभ्य ये शासका: काश्मीरे अभवन् ते सर्वे काश्मीरस्य प्रजाया: हितार्थं सुखसमृद्ध्यर्थं कार्यं कृतवन्त:। ते सर्वदा काश्मीरस्य उन्नतये प्रयत्नशीला: आसन्। एष: कालखण्ड: **प्रातरुदय:** नाम्नोल्लिखित: वर्तते। यथा प्रात: काल: सूर्यस्योदयकाल: भवति सर्वेषां मनसि आशाया: सञ्चार: भवति। तथैव स: काल: अपि आसीत्।

ग्रन्थस्य परिचयानन्तरं प्रस्तावना प्रदत्ता अस्ति तस्यां प्रतिपादितं यत् कस्मिन् ग्रन्थे काश्मीरविषये किं-किं कथितमस्ति। कश्मीरस्योद्भवविषये कथयन्ति यत् कश्मीरे **वितस्तानदी** वर्तते तस्या: वर्णनं वेदकालेऽपि आसीत्। कल्हण: राजतरङ्गिणीग्रन्थे प्रतिपादयति यत् काश्मीरदेश: प्रलयसमये भगवत: मत्स्यावतारादनन्तरमेव प्रादुर्भूत:[1]।

एवमेव काश्मीरप्रदेशस्य परिमाणविषये लिखितमस्ति -

**षष्टिग्रामसहस्राणि षष्टिग्रामशतानि च।**
**षष्टिग्रामस्त्रयो ग्रामा ह्येतत् काश्मीरमण्डलम्**[2] ।।

काश्मीरस्य महत्त्वं प्रतिपादयन् लिखति यत् काश्मीरप्रदेश: विविधरत्नभाण्डै: विभूषित: शंखपद्मादि-नागानामाश्रयस्थलं कुबेरपुरीतुल्य: प्रतीयते। कश्मीर-प्रदेशस्य पर्वतशृंखला तथा प्रतीयन्ते यथा गरुडेन प्रताडितनागानां रक्षणार्थमुत्थापिता: भुजा: सन्ति। तत्र **पापसूदनाख्यं** तीर्थस्थलं वर्तते काष्ठस्वरूपमुमा-पतिमहेश्वरस्य दर्शनात् भोगमोक्षयो: फलं लभ्यते। कश्मीरमण्डले नि:सलिलगिरौ सन्ध्यादेवी जलं धरति तेन ज्ञायते तत्र पुण्यं विद्यमानमस्ति पापस्य सर्वदाभाव: वर्तते[3]। काश्मीरप्रदेशे एतादृशं स्थानं वर्तते यत् **स्वयंभूतीर्थनाम्ना** प्रसिद्ध: तन्निमित्तं कथितं यत् स्वयमग्नि: पृथिवीगर्भात् निर्गत्य भुजौ प्रसार्य हविपदार्थ-ग्रहणं करोति[4]।

एवम् प्रकारेण अत्र काश्मीरे स्थितानां तीर्थस्थलानां विषये प्रतिपादितम्। काश्मीरप्रदेशे तक्षकनागस्य वास: वर्तते वितस्ता नदी सर्वपापविमोचिनी विख्यातास्ति। तत्र स्नात्वा जना: विशुद्धा: भवन्ति, तेषां पापनाशनं भवति। ते परमां गतिं प्राप्नुवन्ति[5]।

काश्मीरप्रान्त: **शारदादेश** नाम्नापि विख्यात आसीत्। प्राचीनसमये विद्याध्ययनार्थं विद्यार्थिन: काश्मीरप्रान्तं प्रति समागच्छन्ति स्म। कल्हण: राजतरङ्गिणीग्रन्थे प्रतिपादयति -

**विद्यावेश्मानि तुङ्गानि कुङ्कुमं सहिमं पयः।**
**द्राक्षी च यत्र सामान्यमस्ति त्रिदिवदुर्लभम्[6]।।**

काश्मीरप्रान्तस्य ख्यातिः 'शैवसिद्धान्तस्याविर्भूतभूमिः' इति नाम्नापि वर्तते। नवमशताब्द्याम् आचार्यवसुगुप्तः **'स्पन्दकारिका'** नामधेयं ग्रन्थं रचितवान्। स्पन्दकारिकाग्रन्थमधिकृत्य सम्पूर्णदेशे शैवमतस्य प्रचारोऽभवत्। शैवदर्शनस्य अपरा शाखा **'प्रत्यभिज्ञादर्शनम्'** वर्तते। काश्मीरस्य शैवदर्शनानन्तरं **त्रिकदर्शनयोरुत्पत्तिर्जाता।** त्रिकदर्शने प्रवृत्ति-निवृत्तिरिति-मार्गद्वयं वर्तते। त्रिकदर्शनं ज्ञान-योग-भक्ति रूपसाधनात्रयस्य समर्थनं करोति। शिवः शक्तिः नरः (भक्तः) त्रयाणां तत्त्वानां समूहः **त्रिकम्**।

काश्मीप्रान्तस्य प्रारम्भात् काश्मीरोदयमिति खण्डकाव्यस्य प्रारम्भः भवति। तत्र विविधानां नृपाणां वर्णनं वर्तते। काश्मीरे यानि प्रमुखदर्शनीयानि स्थलानि तीर्थस्थलानि सन्ति तेषां वर्णनमपि अत्र प्रस्तूयते। तत्र **डल् ह्रदस्य** प्राकृतिकं सौन्दर्यं प्रतिपादितं तथा च सेव-द्राक्षा-केसरादीनां प्रमुखोत्पन्नानां फलादीनां वर्णनमपि कृतं वर्तते। कल्हणकृत राजतरङ्गिणी ग्रन्थस्य श्लोकाः प्रतिपादिताः।

तदनन्तरं प्रस्तावनायामेव राजतरङ्गिणी वर्णिता काश्मीर राजावली दत्तास्ति, यथा -

| | |
|---|---|
| गोनर्दः (गोनन्दः) | नरः द्वितीयः |
| दामोदरः प्रथमः | अक्षः |
| यशोमती (राज्ञी) | गोपादित्यः |
| गोनर्दः (गोनन्दः द्वितीयः)<br>द्वितीयगोनन्दात्परं पञ्चत्रिंशत् राजानोऽधार्मिकाः दुष्टाश्च येषां नामानि नोपलभ्यन्ते) | गोकर्णः |
| लव | नरेन्द्रादित्यः प्रथमः |
| कुशेशयः | युधिष्ठिरः प्रथमः |
| खगेन्द्रः | प्रतापादित्यः प्रथमः |
| सुरेन्द्रः | जलौकाः द्वितीयः |
| गोधरः | तुञ्जीनः प्रथमः |
| सुवर्णः | विजयः |
| जनकः | जयेन्द्रः |
| शचीनरः | सन्धिमतिः (आर्यराजः) |
| अशोकः (बौद्धः) | मेघवाहनः |
| जलोकः प्रथमः | श्रेष्ठसेनः (प्रवरसेनः) प्रथमः |
| दामोदरः द्वितीयः | हिरण्यः (तोरमाणश्च) |
| हुष्कः (तुरुष्कः) | मातृगुप्तः |
| जुष्कः(तुरुष्कः) | प्रवरसेनः द्वितीयः |
| कनिष्कः (तुरुष्कः) | लक्ष्मणः(नरेन्द्रादित्यः)द्वितीयः |
| अभिमन्युः प्रथमः | रणादित्यः (तुञ्जीनः) |
| गोनन्दः तृतीयः | विक्रमादित्यः |
| विभीषणः प्रथमः | बलादित्यः |
| इन्द्रजित् | दुर्लभवर्धनः (प्रज्ञादित्यः) |
| रावणः | दुर्लभकः (प्रतापादित्यः) द्वितीयः |
| विभीषणः द्वितीयः | चन्द्रापीडः (वज्रादित्यः) |
| नरः प्रथमः | तारापीडः (उदयाजित्यः) |
| सिद्धः | अविभुक्तापीडः (ललितादित्यः) |
| उत्पलाक्षः | कुवलयादित्यः |
| हिरण्याक्षः | वज्रादित्यः द्वितीयः |
| हिरण्यकुलः | पृथिव्यापीडः |
| वसुकुलः | संग्रामपीडः |
| मिहिरकुलः (त्रिकोटिहा) | जयापीडः (विनयादित्यः) |
| बकः | ललितापीडः |
| क्षितिनन्दः | संग्रामपीडः (द्वितीयः पृथिव्यापीडः) |
| वसुनन्दः | चिप्पटजयापीडः (बृहस्पतिः[7] |

७०.अजितापीडः ७१.अनङ्गापीडः, ७२.उत्पलापीडः, ७३.अवन्तिवर्मा, ७४.शङ्करवर्मा, ७५.गोपालवर्मा, ७६.सङ्कटवर्मा, ७७.सुगन्धा (राज्ञी), ७८.निर्जितवर्मा, ७९.पार्थः, ८०.चक्रवर्मा, ८१.शूरवर्मा प्रथमः, ८२.उन्मतावन्ति, ८३.शूरवर्मा, ८४.यशस्करः, ८५.वर्णटः, ८६.सङ्ग्रामदेवः (वक्राङ्घिसङ्ग्रामः). ८७.पर्वगुप्तः, ८८.क्षेमगुप्तः, ८९.अभिमन्युः द्वितीयः, ९०.दिद्दा, ९१.नन्दिगुप्तः, ९२.त्रिभुवनगुप्तः, ९३.भीमगुप्तः, ९४.सङ्ग्रामराजः, ९५.हरिराजः, ९६.अनन्तदेवः, ९७.कलशः (रणादित्यः), ९८.हर्षः, ९९.उत्कर्षः, १००.भोजदेवः, १०१.उच्चलः, १०२.रडः शङ्करराजः, १०३.सल्हणः, १०४.सुस्सलः, १०५.भिक्षाचरः, १०६.जयसिंहः

अत्रोक्ताः शासकाः कल्हणस्य राजतरङ्गिणी-ग्रन्थे वर्णितायां सूच्यां प्रतिपादिताः सन्ति। कल्हणादन्यत्रापि हिन्दुराजावली दत्तास्ति, तत्र वर्णिता शासकाः सन्ति –

१०७.परमाणुकः, १०८.वर्तिदेवः, १०९.वोप्यदेवः, ११०.जस्सदेवः, १११.जयदेवः, ११२.राजदेवः, ११३.सङ्ग्रामदेवः, ११४.रामदेवः, ११५.लक्ष्मणदेवः, ११६.सिंहदेवः, ११७.सुहदेवः, ११८.वब्रुवाहनः, ११९.रिक्कणः, १२०.उद्यानदेवः

काश्मीरप्रान्ते ये मुस्लिमशासकाः शासनं कृतवन्तः तेषां सूची प्रदत्तास्ति –

१२१.शाहमीरः (शमसुद्दीनः), १२२.जमशेदः, १२३.अलाउद्दीनः, १२४.शहाबुद्दीनः, १२५.कुतुबुद्दीनः, १२६.सिकन्दरः, १२७.अलीशाहः, १२८.जिनुलब्दीनः, १२९.हाजीखानः, १३०.शासनशाहः (हसनखानः), १३१.मुहम्मदशाहः, १३२.फतेहशाहः, १३३.मुहम्मदशाहः, १३४.इब्राहीमः, १३५.नाजुकशाहः, १३६.कामरानः, १३७.शमस्शाहः, १३८.इस्माइलशाहः, १३९.दौलतखानः, १४०.हबीबः, १४१.गाजीखानः, १४२.दौलतखानः, १४३.हुसेनखानः, १४४.खानजमानः, १४५.अलीखानः, १४६.यूसुफशाहः, १४७.मुवारकखानः, १४८.लोहरचकः, १४९.याकूबः, १५०.युसुफखानः, १५१.काजीअला, १५२.मिर्जायादगारः, १५३.शेखफरीदः, १५४.मिर्जालस्करः, १५५.अशाहखानः, १५६.अह्लादखानः, १५७.सुल्तानमहामदकुलीखानः, १५८.महम्मदशाहदुरानी, १५९.शाहशूजा[८]।

उपरिवर्णिताः यवनशासकाः काश्मीरप्रान्ते शासनं कृतवन्तः। शाहशूजा अन्तिमः यवनशासकः आसीत्। तस्योपरि 160 सिक्खसम्राट्महाराज-**रणजित्सिंह** आक्रमणमकरोत्। शाहशूजां पराजित्य काश्मीरे तेषां शासनमभवत्। तदनन्तरं तत्र ये शासका अभवन् तेषाम् सूची –

**दुर्गराजानः** –

१६१.श्रीगुलाबसिंहः १८४३ ख्रीष्टाब्दः, १६२.श्री रणवीरसिंहः १८५८ ख्रीष्टाब्दः, १६३.श्रीप्रतापसिंहः १८८५ ख्रीष्टाब्दः, १६४.श्रीहरिसिंहः १९२५ ख्रीष्टाब्दः, डॉ. कर्णसिंहः १९४९ ख्रीष्टाब्दतो वर्तमानः[९]

डॉ. सूर्यमणिरथमहोदयाः 'काश्मीरोदयम्' इति

ऐतिहासिकं खण्डकाव्यस्य प्रारम्भं मङ्गलाचरणेन कुर्वन्ति। मङ्गलाचरणं तु अवश्यमेव करणीयम् कार्यस्यादौ मध्यान्ते च निर्विघ्नं समाप्त्यर्थम्। तदर्थं ते सर्वप्रथमं भारतदेशस्य पूर्वस्यां दिशि नीलाचले स्थितशङ्खक्षेत्रे **पुरीस्थजगन्नाथदेवं** स्मरन्ति। तदनन्तरं जम्मूप्रदेशे 'कटरा' इति स्थानस्य समीपे त्रिकूटपर्वते विद्यमानां त्रिभुवनजननीं वैष्णवीं समाराधयन्ति। द्वौ मातृपितृस्वरूपौ स्तः। माता-पितरौ कदापि निजसन्ततेः अहितं न कामयतः। तेषां मङ्गलकामना सर्वदा स्वापत्यैः सार्धं भवति[10]। मङ्गलाचरणानन्तरं डॉ. रथमहोदयाः स्वस्य विषये किञ्चित् लिखन्ति। यत् तेषां जन्म ब्राह्मणकुले जातम्। श्री जनार्दनरथः जनकः श्रीमती नेत्रमणिरथ जननी आसीत्। राष्ट्रिय-संस्कृत-संस्थानस्य 'पुरी' नगरे स्थितस्य श्रीसदाशिवपरिसरे साहित्यविभागे विभागाध्यक्षरूपेण कार्यं कुर्वन्नासीत्। विभागात् स्थानान्तरणस्यादेशः सम्प्राप्तः तदनन्तरं २६ जूनमासे २०१६ ख्रीष्टाब्दे जम्मूकाश्मीरप्रान्तं समागतः। तत्र जम्मूकाश्मीरे पूर्वं महाराजा गुलाबसिंह इति शासक आसीत् तस्य पुत्रः श्री रणवीरसिंहः १८५८ तः १८८५ ख्रीष्टाब्दे राजा आसीत्। तस्य नाम्ना राष्ट्रिय-संस्कृत-संस्थानस्य श्री रणवीरपरिसरः वर्तते। तत्र महोदयः साहित्यविभागे विभागाध्यक्षत्वेन कार्यं समारम्भमकरोत्। डॉ. रथमहोदयः ऐतिहासिकं काव्यं पठन्नासीत्। तैः काश्मीरस्येतिहासः पठितः तदनन्तरम् ऐतिहासिकं खण्डकाव्यस्य लेखनं प्रारब्धम्।

काव्यस्य प्रारम्भः भवति कविः कथयति यत् देवराजेन्द्रस्य नन्दनवने देवाः ऋषयश्च मिलित्वा एकां सभामायोजितवन्तः। तत्र सभायां सर्वेषां मनोरञ्जनार्थम् देवराजेन्द्रलोकस्य स्वर्वेश्या **रम्भा** इति नृत्यगीतादिकं प्रस्तुतवती। तत्रैव नवयौवना **उर्वशीनाम्नी** देवाङ्गनापि सभायामुपस्थिता। कामदेवस्य शरसमाना देवाङ्गनापि तत्र समायाता। एताः देवाङ्गनाः पुष्पवस्त्रालङ्कार-सुगन्धितद्रव्यैः सुशोभिता आसन्। तत्र नन्दनवने सभायामेव मन्दारकल्पहरिचन्दनादयः पादपाः सुगन्धिं वितरन्त आसन्। भ्रमराः गुञ्जन्तः सर्वत्र भ्रमन्ति स्म। देवराजेन्द्रः स्वपत्न्या सार्धं सिंहासनारूढः सन् स्मितं हसन् सभायाः शोभां वर्धयति स्म। तस्यां सभायाम् 'ॐकार' ध्वनिः परिव्याप्ता आसीत् तथा पितामहः ब्रह्मा सभापतिरूपेण विराजमाना आसन्। इन्द्रस्य नन्दनवने या सभा आयोजिता तादृशी सभा न पूर्वमायोजिता न पुनः अग्रे आयोजिष्यते इति भावं कल्पयन् तत्र सर्वेऽपि देवाः उपस्थिता आसन्। शिवकार्तिकेयगणेशयमादिसुराः उपस्थिता आसन्। तत्र सर्वे ब्रह्मणः विरचितायाः सृष्टेः प्रशंसां कुर्वन्ति स्म। तत्र पृथिव्याः सौन्दर्यं सृष्टेः विविधतायाः वर्णनं कुर्वन् कथितं यत् महासमुद्र-हिमालयादीन् पर्वतान् पृथिवी धारयति। निर्झरजल-पूर्णदेशः भाति। धान्यादिशस्यैः पृथिवी हरिद्वर्णा पशुपक्षिमनुष्यादिभिः प्राणिभिः शोभते। एतेन वसुमत्याः वैविध्यं परिदृश्यते। तस्मिन् समये हरिनाम गायन् ब्रह्मणः मानसपुत्रो नारदः समुपस्थितः। सर्वे देवाः कथयन्ति हे ब्रह्मनन्दन नारद! भवान् तु सर्वत्र अटति तर्हि वदतु कुत्रचित् भवता नूतनस्थानं वा दृष्टं किम् न वा। तदा नारदः

विहसन् सर्वान् देवान् दन्ताभया धवलयन् मधुरगिरया कथयति परमपितुः ब्रह्मणः पृथिव्यां **भारतदेशः** सुप्रसिद्धः वर्तते। परं पवित्रविशालसागरः तस्य पादौ क्षालयति। वेदमन्त्रैः पावितः भारतमिति देशः पृथिवीतले चकास्ते। भारतदेशस्य सीमा पूर्वसमुद्रात् पश्चिमसमुद्रपर्यन्तं विद्यते। विन्ध्याचलमध्यभागे शोभते हिमालयः मस्तकमणिरूपेण विराजते। भारतदेशस्य उत्तरभागे हिमालयस्य समीपे प्राकृतिकशोभायुक्तः सुविख्यातः प्रदेशः वर्तते काश्मीरः। काश्मीरस्य भूमिः पवित्रा वर्तते। तपस्यायोगेन सती अत्र तपस्यामकरोत्। आवर्षमत्र पुष्पाणि विकसितानि भवन्ति। सत्याः तपस्या-कारणात् काश्मीरभूमिः पवित्रा वर्तते। वेदेषु काश्मीरस्य नाम श्रूयते।

तदनन्तरं **काश्मीरेति** शब्दस्य **नामकरणं** कथं जातम् इति विषये कथितम् प्रकाशनार्थे काश् धातुः मुडागमात् ईरन् इति प्रत्ययत्वात् काश्मीर इति शब्दः सिद्धयति। अस्यार्थः यः देशः सर्वदा प्रकाशमयः भवति। तदनन्तरं काश्मीरस्य निर्माणं केन कृतम्। 'काश्मीरनामकरणे नीलमुनेः कथनमस्ति यत् केन (प्रजापतिना कश्यपेन) निर्माणं कृतम्। द्वितीयमतमस्ति यत् काश्मीरे प्रभूतं जलमासीत् तानि जलानि भगवान् हरिः निष्कासितवान् अतः देशस्यास्य नाम '**काश्मीर**' इति सञ्जातः[11]।

अनन्तरं डॉ. रथमहोदयेन काश्मीरस्य प्रथमशासक गोनन्दात् वर्णनं प्रारब्धम्। गोनन्दः प्रथमशासकः आसीत्। गोनन्दस्य सम्बन्धः जरासन्धेन आसीत्। यदा जरासन्धेन कृष्णबलरामयोः युद्धमभवत् तदा जरासन्धेन गोनन्दः साहाय्यार्थमाहूतः। युद्धे बलरामः गोनन्दं व्यापादितवान्। गोनन्दात् अनन्तरं तस्य पुत्रो दामोदरः राज्ये राजा अभवत्। पितुः हत्यायाः प्रतिशोधं स्वीकर्तुं कृष्णेन सह युद्धं कृतवान् तत्र कृष्णेन मारितः। एवं प्रकारेणैव क्रमशः काश्मीरशासकानां वर्णनमत्र कृतं वर्तते। दामोदरात् अनन्तरं तस्या पत्नी **यशोमती** राजसिंहासने उपविष्टा। गोनन्दद्वितीयः राजा अभवत्, कालानन्तरम् कल्हणः कथयति यत् गोनन्दद्वितीयात् परं पञ्चत्रिंशद् राजानोऽधार्मिकाः दुष्टाश्च येषां नामानि नोपलभ्यन्ते।

शचीनरः काश्मीरे ४५ तमः गोनन्दीयवंशीयः राजा आसीत्। शचीनरस्य पिता जनकः आसीत् माता च शची आसीत्। कतिचन वर्षाणि राज्यसुखं भुक्त्वा शचीनरः यमलोकं गतः। पश्चात् पितृव्यपुत्रः अशोकः राजा अभवत्। अशोकः उत्तमः राजा आसीत्, प्रजाहिताय कार्याणि कृतवान्। नूतनकूपानां निर्माणं, पादपरोपणं, धर्मशालानां निर्माणं कारितवान्। अशोकस्य युद्धं मलेच्छैः सार्धम् अभवत्। तत्र सः विजयी जातः। अशोकेन एकस्य स्वर्गकान्तिमन्नगरस्य निर्माणं कारितम्। तन्नगरम् अधुनापि काश्मीरे वर्तते। **श्रीनगरमिति** नाम्ना सुप्रसिद्धमस्ति तन्नगरम्। तस्य पुत्रः जलौकः काश्मीरस्य राजा अभवत्। क्रमशः कनिष्कः, दामोदरः द्वितीयः जलौकः द्वितीयः राजा अभवत्। एवम् प्रकारेण '**निशा-उदये**' विविधानां काश्मीरराज्ञां वर्णनं वर्तते।

हिन्दुनृपाणामनन्तरं काश्मीरे यवनानां

शासनमभवत्। शाहमीरः यवनशासकेषु काश्मीरे प्रथमः शासकः आसीत्। काश्मीरे **षट्त्रिंशत्** यवनराजानः शासनं कृतवन्तः। तेषु दशमः हसनखानः लोकोपकारकः राजा आसीत्। महमदशाहः हसनखानात् अनन्तरं सिंहासनोपविष्टः। ततः परं युसुफशाहः काश्मीरे राजा अभवत्। काश्मीरे राजा अकबरः सुशासनमकरोत्। अकबरः हिन्दूनामुपरि ब्राह्मणानाञ्चोपरि अतीव उदारः आसीत्। तस्य पुत्रः जहाङ्गिरः काश्मीरस्योत्तमां शोभां दृष्ट्वा पत्न्या सार्धं काश्मीरं प्रति समागतः। ततो महमदशाहदुरानी शासकः आसीत्। तदनन्तरं यवनानामन्तिमः शासकः शाहशूजा आसीत्। तस्य मृत्युः अभवत् तेन काश्मीरस्य **निशाकालः समाप्तः**।

अनन्तरं काश्मीरे **प्रातरुदयः** सञ्जातः। शाहशूजां सिक्खसम्राड्रणजितसिंहः विजित्य काश्मीरप्रदेशस्य शासकः अभवत्। महाराजा रणजितसिंहः '**पञ्जाबकेशरी**' नाम्ना ख्यातः आसीत्। तेन पठाननृपतिं पराजित्य **मूल्यवान्कोहेनुररत्नं** प्राप्तम्। इदं रत्नं देवानामपि दुर्लभमासीत्[12]।

कविः काश्मीरस्य जम्मूप्रदेशस्य विषये प्रतिपादयति तत्र तापीसरिद्जलैः पवित्रितः दुर्गर इति एकः देशः अस्ति। यदा पञ्जाबनृपः दुर्गरदेशजम्मूजयार्थं सेनापतिं दीवानचन्द्रमिश्रं प्रेषितवान् तदा अष्टादशवर्षीयः गुलाबसिंहः स्वपराक्रमं दर्शितवान्। तस्य पराक्रमं दृष्ट्वा दीवानचन्द्रः रणजितसिंहाय न्यवेदयत्। सः सेनापति-रूपेण रणजित्सिंहेन सार्धं कार्यं कृतवान्। महाराजा-रणजित्सिंहः स्वमृत्योः पूर्वं जम्मूनगरस्य समीपवर्तिनः '**अखनुर**' इति स्थानस्य निकटे चन्द्रभागानदीतटे गुलाबसिंहस्य राजतिलकमकरोत्।

गुलाबसिंहात् परं तस्य पुत्रः रणवीरसिंहः काश्मीरस्य राजा अभवत्। १८८२ ख्रीष्टाब्दे रणवीरसिंहः आङ्ग्लशासनेन '**एकविंशतिशतघ्नीचालकः**' इति सम्मानेन विभूषितः। एतेन सम्मानेन सह रणवीरसिंहः महाराज्ञ्याः विक्टोरियायाः मन्त्रित्वं प्राप्तवान्। १८८५ ख्रीष्टाब्दे रणवीरसिंहस्य देहान्तः जातः। अनन्तरं तस्य पुत्रः प्रतापसिंहः राजपदमङ्लकरोत्[13]। तस्मिन् समये आङ्ग्लानां शासनमासीत् तदा '**कर**' रूपेण प्रतापसिंहः धनादिकं प्रेषयति स्म।

१९२५ ख्रीष्टाब्दे प्रतापसिंहः दिवङ्गतः। भ्रातुष्पुत्रः हरिसिंहः जम्मूकाश्मीरस्य राजा अभवत्। श्रीमतः हरिसिंहस्य पुत्रः श्रीमान् कर्णसिंहः। १९३१ ख्रीष्टाब्दे जन्मग्रहणमकरोत्। यदा सः अष्टादशवर्षीयः सञ्जातः तदा राजा हरिसिंहः तस्य जम्मूकाश्मीरस्य राजा रूपेण राजतिलकमकरोत्। श्रीमान्कर्णसिंहः गुणवान् संस्कृतपण्डितानुरागी अस्ति। नेपालराजदुहितृयशो-लक्ष्मीं परिणीतवान् श्रीमान्कर्णसिंहः। तेषां गृहे द्वौ पुत्रौ एका कन्या च समुत्पन्ना। परिवारः सुखसमृद्धया सुसम्पन्नः। अनन्तरं भारतदेशः स्वतन्त्रोऽभवत्। डॉ. रथमहोदयः काश्मीरस्य प्राकृतिकं सौन्दर्यं प्रतिपादयति। काश्मीरे श्रीनगरमिति पर्यटनस्थली वर्तते। तत्र विशालः ह्रदः 'डलह्रदः' (डलझील) नाम्ना विख्यातः। यदा जनाः भ्रमणार्थमागच्छन्ति तदा नौकया तत्र भ्रमन्ति। नौकादिकार्येण जनाः स्वजीविकामर्जयन्ति। डलह्रदस्य

शोभां दृष्ट्वा जनाः कृतकृत्या भवन्ति। एवं प्रकारेण काश्मीरस्य प्राकृतिकं सौन्दर्यं वर्णितमस्ति[14]।

काश्मीरप्रदेशे कृषिकार्यमपि उत्कृष्टं वर्तते। तत्र सेवफलानि उत्तमानि भवन्ति। कुङ्कुमकेसराख्य-बहुमूल्यवस्तूनि बहुपरिश्रमेण ते उत्पादयन्ति। प्राकृतिकं सौन्दर्यं सुख-समृद्धिं दृष्ट्वा सीमान्तविद्यमानः पाकिस्तानदेशः वारम्वारं तत्र हिंसकघटनाः करोति तथा च काश्मीरं निजाधीनं कर्तुं विफलं प्रयासं करोति। नारदमुखात् यस्य गुणगानं श्रुतं स्यात् तत् क्षेत्रं वयम् किमर्थं दद्मः। काश्मीरं तु अस्माकं मस्तकस्वरूपम्। मस्तकं विना कश्चित् कथं जीवेत्।

एवम् प्रकारेण नारदस्य वचनं श्रुत्वा देवाः काश्मीरं द्रष्टुमागताः। देवाः यदा अत्र समागताः तदनन्तरं ते इतः देवलोकस्वर्गं न गताः। डॉ. सूर्यमणिरथमहोदयस्य ऐतिहासिकं खण्डकाव्यमनेन प्रकारेण पूर्णतामेति।

**निष्कर्षः** – काश्मीरोदयम् इति ऐतिहासिकं खण्डकाव्यं वर्तते। एतस्य अध्ययनं कृत्वा जनाः काश्मीरस्य संक्षिप्तपरिचयं प्राप्तुं शक्नुवन्ति। असौ पद्यात्मकग्रन्थः सर्वेषां हृदयानि आकर्षति । कविः स्वकाव्यात्मकज्ञानेन छन्दोबद्धरोचकपद्यानां रचनां विधाय पाठकानां पुरतः आनन्दम् उपस्थापयति। अत्र अत्यन्तसरलभाषायाः प्रयोगः विहितः। पठित्वा पाठकाः आनन्दमनुभवन्ति।

**सन्दर्भग्रन्थाः .**

1. **राजतरङ्गिणी** व्याख्याकारः श्रीरामतेजशास्त्री पाण्डेयः, चौखम्बा संस्कृत प्रतिष्ठान, 38 यू.ए.जवाहरनगर बंगलो रोड दिल्ली 110007, पुनर्मुद्रित संस्करण 2015

2. **काश्मीरोदयम्** (मणिव्याख्यायुक्तम्), रचयिता व्याख्याकर्ता च प्रो.सूर्यमणिरथः, ओडिशा प्रकाशिका – कवितारथः प्रथमप्रकाशनम्– कार्त्तिकपूर्णिमा 17.11.2013

3. **काश्मीरेतिहासः** प्रस्तावनालेखकः जम्मू. काश्मीरमहाराजाधिराजः डॉ. कर्णसिंहः, एम.ए.– पी.एच.डी., पर्यटन–नागरविमाननमन्त्री भारतप्रशास–नस्य, प्रधानसम्पादकः डॉ.मण्डनमिश्रः मीमांसा–साहित्याचार्यः एम.ए., पी.एच.डी., मूलग्रन्थलेखकः स्वर्गीय आचार्य–श्रीहनुमत्प्रसादशास्त्री पण्डितमार्तण्डः (विद्यापीठस्य भूतपूर्वप्राध्यापकः) श्री लालबहादुर–शास्त्रीराष्ट्रिय–संस्कृतविद्यापीठम् दिल्ली विक्रमसंवत् 2024

4. **THE NILAMATA PURANA** VOL II ( A CRITICAL EDITION & ENGLISH TRANSLATION ) BY DR.VED KUMARI PUBLISHED BY J&K ACADEMY OF ART .CULTURE AND LANGUAGES SRINAGAR

5. **Mahabharat Samhita** Part 01 Author .Bhandarkar Oriental Researh Instiute .Publisher. Bhandarkar Oriental Researh Institute.Publication Year 1971

31.NATYASASTRA OF BHARATMUNI CRITICALLY EDITED WITH PRADIPA HINDI COMMENTARY VARIOUS READING INTRODUCTION PREFACE INDEX AND CRITICAL NOTES PART FIRST (CHAPTER 01 to 07) By Prof.BABU LAL SUKLA SASTRI PUBLICATION CHAUKHAMBHA SANSKRIT SANSTHAN VARANASI EDITION 2014

32.NATYASHASTRA OF BHARATMUNI PART

FIRST WITH THE COMMENTERY ABHINAVBHARTI BY ABHINAVA GUPTACHARYA ` PUBLICATION BANARAS HINDU UNIVERSITY VARANASI 1971

6. **जोनराजकृत राजतरङ्गिणी** आलोचनात्मक भूमिका, ऐतिहासिक, भौगोलिक तथा सांस्कृतिक अध्ययन एवं हिन्दी अनुवाद सहित) डॉ. रघुनाथ सिंह, एम.ए., एल. एल. बी, पीएच्.डी. चौखम्बा संस्कृत सीरिज आफिस वाराणसी-; मुद्रक विद्या विलास प्रेस, वाराणसी संस्करण प्रथम, वि.संवत् 2038 (ख्रीष्टाब्द 1972)

7. **श्रीवर-कृत जैन-राजतरङ्गिणी** (तरङ्ग 1 तथा 2) आलोचनात्मक भूमिका, ऐतिहासिक, भौगोलिक तथा सांस्कृतिक अध्ययन एवं हिन्दी अनुवाद सहित) डॉ. रघुनाथ सिंह एम.ए., एल.एल.बी, पीएच्.डी., डी.लिट्, एफ.आर.ए.एस (लन्दन) चौखम्बा अमरभारती प्रकाशन, वाराणसी मुद्रक बर्द्धमान् मुद्रणालय, वाराणसी संस्करण प्रथम् वि.स.2033 (ख्रीष्टाब्द:1977)

8. **कल्हणकृत राजतरंगिणी-भाष्यकार रघुनाथ सिंह** एम.ए.एल.एल.बी., पी.एच.डी. हिन्दी प्रचारक संस्थान (व्यवस्था- कृष्णचन्द्र बेरी एण्ड सन्स) पो.बॉक्स नं. 106.सी.21/30 पिशाचमोचन वाराणसी- 1 जनवरी 1970 काशी हिन्दु विश्वविद्यालय की पीएच.डी. उपाधि हेतु स्वीकृत शोध- प्रबन्ध मुद्रक विक्रम पञ्चाङ्ग प्रेस भदैनी वाराणसी-1

9. **महर्षि व्यास प्रणीत महाभारत (वनपर्व)** भाषाभाष्य समेत भाषांतरकर्ता और प्रकाशक श्रीपाद दामोदर सातवलेकर, स्वाध्याय मंडल, औंध (जि.सातार:) संवत् 1982, शक 1847

**पादटिप्पण्य:-**

1. पुरा सतीसरः कल्पारम्भात् प्रभृति भूरभूत्। कुक्षौ हिमाद्रेरणोभिः पूर्णा मन्वन्तराणि षट्।।
अथ वैवस्वतीयेऽस्मिन् प्राप्ते मन्वन्तरे सुरान्। द्रुहिणोपेन्द्ररुद्रादीन् अवतार्य प्रजासृजा।।
कश्यपेन तदन्तःस्थं घातयित्वा जलोद्भवम्। निर्ममे तत् सरो भूमौ कश्मीरा इति मण्डलम्।।
उद्यद्वैतस्तनिःष्यन्ददण्डकुण्डात् पत्रिणा। यत् सर्वनागा-धीशेन नीलेन परिपाल्यते।।
राजतरङ्गिणी, श्लो. १/२५ तः २८ पर्यन्तम्, पृ.सं. २४ तः ५७

2. काश्मीरोदयम्, पृ.सं. ६

3. क. शङ्खपद्ममुखैर्नागैर्नानारत्नावभासिभिः। नगरं धनदस्येव निधिभिर्यान्निषेव्यते।।३०।। राजतरङ्गिणी, १/३०, पृ.सं. ६३

ख. यत्तार्क्ष्यभीत्या प्राप्तानां नागानां गुप्तये ध्रुवम्। प्रसारितं भुजं पृष्ठे शैलप्रकरलीलया।।३१।। राजतरङ्गिणी, 1/31, पृ.सं. ६६

ग. भुक्तिमुक्तिफलप्राप्तिः काष्ठरूपमुमापतिम्। पापसूदनतीर्थान्तर्यत्र संस्पृशता भवेत्।। राजतरङ्गिणी, १/३२, पृ.सं. ६६

घ. सन्ध्यादेवीजलं यस्मिन् धत्ते निःसलिले गिरौ। दर्शनं पुण्यपापानामन्वयव्यतिरेकयोः।। राजत-रङ्गिणी, १/३३, पृ.सं. ७१

4. स्वयम्भूर्यत्र हुतभुक् भुवो गर्भात् समुन्मिषन्। जुह्वतां विगृह्णाति ज्वालाभुजवनैर्हविः।। राजतरङ्गिणी,

१/३५ पृ.सं. ७३

5. काश्मीरेष्वेव नागस्य भवनं तक्षकस्य च।
वितस्ताख्यमिति ख्यातं सर्वपापप्रमोचनम्।।
तत्र स्नात्वा नरो नूनं वाजपेयमवाप्नुयात्।
सर्वपापविशुद्धात्मा गच्छेच्च परमां गतिम्।।
महा.वन. ८२/९०-९१

6. राजतरङ्गिणी, १/४२ पृ.सं. ८९

7. काश्मीरोदयम्, पृ.सं. १६-१७

८. काश्मीरोदयम्, पृ.सं. १७, १८

९. काश्मीरोदयम्, पृ.सं. १९

१०. नीलाद्रौ शङ्कतीर्थे जलदरुचिजगन्नाथदेव विराजन्,
अन्यस्मिंश्च त्रिकूटे त्रिभुवनजननी वैष्णवी राजमाना।
अस्मिन्मत्काव्यबन्धे व्यपनयतु हतिं दुर्भरां दुर्निवारां
किं कार्यं वा महीस्तनुजसुखमृते भाति पित्रोर्धरायाम्।। काश्मीरोदयम्, १, पृ.सं. २०

11. क: प्रजापतिरुद्दिष्ट: कश्यपश्च प्रजापति:।
तेनासौ निर्मितो देश: काश्मीराख्यो भविष्यति।
कं वारि हरिणा यस्माद् देशादस्मादपाकृतम्।
काश्मीराख्यं तत: पश्य नाम लोके भविष्यति।
नीलमतपुराणम्, श्लो. २२६-२२७, पृ.सं. -५९

ख.कश्चित् प्रकाशनगत: 'कश' धातुरस्ति - काश्मीरनामकरणं कुरुते यथार्थम् (काश्मीरोदयम् पृ.सं.४४ श्लोकसंख्या-३५)

12. एतत्परं नृपपदाङ्कितशाहशूजां
सिंहोत्तर: स रणजित् चरमं विजित्य।
काश्मीरराज्यमतिपावनमुन्नतञ्च
नैजोजसा प्रकृतिशोभित-मध्यकार्षीत्।।
तस्मान्नृपात् स रणजित् विजिताद् बलेन
कोहेनुराख्यममरैरपि दुर्लभञ्च ।
जग्राह रत्नमतियत्नसुरक्षितं तन्
मानप्रदं समितिलब्ध-जयस्वरूपम्।।
काश्मीरोदयम् -श्लोक सं.1१३८/१३९
पृ.सं.१२८/१२९

13. कालातिथौ सुकृतभाजि गुलाबसिंहे
तस्यात्मजो वरगुणो रणवीरसिंह:।
भूत्वा नृपो ब्रिटिसशासनलब्धमान:
शेषक्षणे क्षणविनाशि जहौ शरीरम्।।
काश्मीरोदयम् -श्लोक सं.१४६ पृ.सं.१३४

डालह्रदो लसति पर्वतपाददेशे
भूस्वर्गभूमिवलये स्वतनुं वितन्वन्।
देशान्तराधिगतपर्यटकै: परीते
यन्त्रोडुपेषु पणनं क्रियते वणिग्भि:।। का.१५६.

**शोधछात्र:, साहित्यविभाग:**
केन्द्रीयसंस्कृतविश्वविद्यालय: (वेदव्यासपरिसर:) बलाहर:,
प्रागपुरम्, जिला कांगडा, हिमाचलप्रदेश:। प्रवक्ता (संस्कृत)
राजकीय वरि.मा.विद्यालय: (पंजगाई),
बिलासपुरम्, हिमाचलप्रदेश:।
hemraj.shastri@gmail.com
9816133680, 9817733680

# वेदेषु प्रतिपादितानि जीवनमूल्यानि

❑ डॉ. योगिनी हिमांशु व्यासः

भारतभूमेः इदं गौरवं सुप्राचीनकालादेव सुनिश्चितं यत् अयं देशः आध्यात्मिकभौतिकोभयदृष्ट्या समुन्नतः सन् विश्वनेतृत्वं कृतवान्। मनुष्यजीवनं '**सत्यम् शिवम् सुन्दरम्**' इति त्रिविधसंस्कारैः परिपूर्णं कर्तुम् अस्माकं ऋषिमुनिभिः, स्मृतिकारैः, मनीषिभिः नाट्यकारैः, गद्यकारैश्च भारतराष्ट्राय उत्कृष्टम् अनुपमं मार्गदर्शनं प्रदत्तम्। कोऽपि मनुष्यः मार्गदर्शनमेनमनुसृत्य स्वजीवनं सार्थकं कर्तुं शक्नोति। अस्यां पृथिव्यां जलम्, अन्नम्, सुभाषितम् इति त्रीणि रत्नानि विद्यन्ते।

ऋग्वेदे 'न ऋते श्रान्तस्य सख्याय देवाः' (४.३३.११), 'स्वस्ति पन्थानमनुचरेम' (५.५१.१४), 'इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृह्यन्ति' (८.२.१८), यजुर्वेदे 'ऋतस्य पथा प्रेत' (७.४५), 'यशः श्रीः श्रयतां मयि' (२९.४), 'भूत्यै जागरणम् अभूत्यै स्वपनम्' (३०.१७), अथर्ववेदे 'सं श्रुतेन गमेमहि' (१.१-४), 'मा नो द्विक्षत कश्चन' (१२.१.२८), 'कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः' (७.५२.८), सोमवेदे 'भद्रा उत प्रशस्तयः' (१११), 'कृधि नो यशसे जने' (४७९), 'अहं प्रवदिता स्याम' (६११)- इत्यादीनि विचारमौक्तिकानि मनुष्यजीवनं श्रेयस्करं कर्तुं शक्नुवन्ति।

शुक्लयजुर्वेदसंहितायां त्रयोविंशतितमे अध्याये गृत्समदऋषिः निगदति-

**गणानां त्वा गणपतिं हवामहे।**
**प्रियाणां त्वा प्रियपतिं हवामहे।**
**निधीनां त्वा निधिपतिं हवामहे वसो मम।**
**आहमजानि गर्भधमा त्वमजासि गर्भधम्।**

**शुक्लयजुर्वेदः २३/१९**

मन्त्रस्यास्य प्रयोगं वैदिकानामखण्डित-परम्परानुसारं गणपतिपूजने चतुर्वेदिनः कुर्वन्ति, तत्र यजुर्विधानमपि प्रमाणम्। गणेशः गणानां पतिः, प्रियाणां पतिः निधीनां पतिश्च विद्यते इति तस्य स्तुतिर्भवति। एतादृशस्य गणपतेरहमुपासकः अत एव हे वसो! त्वं मम पालकः प्रेरकश्चासि। अत एव यदिदं कर्मरूपं बीजं वपामि, तस्य निर्विघ्नेन पूर्णत्वं नेता सफलतां प्रापयिता च त्वमसि।

समाजे किमपि कार्यं यदारभ्यते, तदा सर्वेषां सहकार्यमावश्यकमस्ति। कोऽप्येकः कार्यं कर्तुं सफलो न भवति। अनेकेषां समूहो गणः तेषामधिपतिः गणपतिः, नायकः, विशेषेण नायकः, विनायको भवति। तस्य मार्गदर्शनेन सर्वं कार्यं सिद्धं भवति। स सर्वेषां गणानां प्रियश्च भवितुमर्हति। अन्यथा सर्वे तस्य मार्गदर्शनानुसारं कार्यं न करिष्यन्ति अन्यच्च कार्यार्थं निधेः धनस्य बुद्धिरूपधनस्य चावश्यकता भवति। सर्वेषां तस्य गणाध्यक्षस्य कृते ममता ममत्वबुद्धिश्च भवति। तेषां सहकार्येण समष्टिगतं तस्य साङ्घिकं कार्यं सिद्धं भवति। समष्टिगते हि कार्ये व्यक्तिगतं हितं समाविष्टं भवत्यत्र न काप्याशङ्का।

ऋग्वेदस्य तृतीयमण्डले विश्वामित्रऋषिः सवितरं देवम् उद्दिश्य कथयति-

**तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।**
**धियो यो नः प्रचोदयात्।। ऋग्वेदः- ३/६२/१०**

अयं ऋग्वेदे तृतीयमण्डले द्विषष्टितमे (६२)

सूक्ते दशमो मन्त्रः। शुक्लयजुर्वेदे त्रिवारं त्रिष्वध्यायेषु समुल्लेखः, तृतीयाध्याये पञ्चत्रिंशत्तमो, द्वाविंशतितमेऽध्याये नवमो, त्रिंशत्तमेऽध्याये द्वितीयो मन्त्रः (३.३५.२२/९, ३०/२) तैत्तिरीयसंहितायां (१/५/६/४, ४.१.११.१), तैत्तिरीयारण्यकेऽपि (१.११.२) मन्त्रोऽयं प्राप्यते।

समाजे स्वकीयजीवने सत्प्रेरणाया अतीव महत्त्वम्। तस्य प्रेरणादातुः यत्तेजः सूर्यमण्डलान्तर्गतं विद्यते, तत्तेजसो वयं ध्यानं कुर्मः। अत्र तेजसः उपासना प्रतिपादिता। तेन च बुद्धेस्तेजस्विता जायते, अपि योग्यायोग्यकर्मणां निर्णयक्षमता वर्धते। सुयोग्यकर्मणि स्वाभाविकी प्रवृत्तिः सवितृदेवप्रेरणया भवति। तत्तेजोऽस्माकं बुद्धी सत्कर्मणि प्रेरयतु। गायत्रीमन्त्रत्वेन प्रसिद्धस्यास्य सवितृमन्त्रस्यातीव महत्त्वम्।

समाजकल्याणयस्य महत्त्वपूर्णं सिद्धान्तं प्रतिपादयता गौतमऋषिणा ऋग्वेदे देवानां प्रार्थना कृता अस्ति। यथा –

**आ नो भद्राः क्रतवो यन्तु विश्वतो**
**अदब्धासो अपरीतास उद्भिदः।**
**देवा नो यथा सदमिद्वृधे अस-**
**न्नप्रायुवो रक्षितारो दिवेदिवे।।**

**ऋग्वेदः- १/१८९/१**

ऋग्वेदे प्रथममण्डले शताधिकोननवतितमे (१८९) सूक्ते प्रथमोऽयं मन्त्रः। शुक्लयजुर्वेदेऽपि पञ्चविंशतितमेऽध्याये चतुर्दशो मन्त्रः। अस्य देवा विश्वेदेवा वा देवतारूपाः, जगती छन्दः, गौतमो राहुगण ऋषिः।

गौतमऋषेरियं देवानां कृते प्रार्थना। हे देवाः, न केवलं ममैवैकस्य, अपितु अस्माकं सर्वेषां, समग्रसमष्टेः समाजस्य वा कल्याणं येन कारणेन कार्येण वा भवेत्, तथास्माकं क्रतवः आ यान्तु। क्रतुशब्दस्य यज्ञ इत्येकोऽर्थः। भगवद्गीतायां यज्ञचक्रप्रवर्तनस्य वर्णनं प्राप्यते। तस्य सर्वकल्याणरूपस्य यज्ञस्य प्रवर्तनार्थमस्माकं सर्वेषां दृढो निर्धारो भवतु। क्रतुशब्दस्य संकल्पो विचार इत्यप्यर्थो भवति। सर्वेषां सर्वकल्याणार्थं संकल्पो भवतु। सर्वतः सर्वदिग्भ्यः आ समन्तात्, एतादृशा क्रतवः संकल्पा आगच्छन्तु। ते क्रतवः कल्याणप्रदा, अदब्धासः परहिंसाया विचाररहिताः निर्विघ्नाः, अपरीतासः अपरिचिताः नवीनाः, उद्भिदः सर्जनात्मकानां संकल्पानां विचाराणां प्रकटीकर्तारः एतादृशाः स्युः। यदा वयं एवं प्रकारेण कार्यशीलाः स्याम, तदा स्वाभाविकतया देवा सदैवास्माकं प्रतिदिनं वृद्ध्यै कल्याणार्थम् अप्रमादशीलाः स्युः।

वैदिकसाहित्ये मधुविद्याप्रतिपादकाः उत्कृष्टाः मन्त्राः सन्ति। ऋग्वेदस्य प्रथममण्डले गौतमो ऋषिः निगदति यत्–

**मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।**
**माध्वीर्नः सन्त्वोषधीः।। ऋग्वेदः- १/९०/६.**

अयं ऋग्वेदे प्रथममण्डले नवतितमे सूक्ते षष्ठो मन्त्रः। शुक्लयजुर्वेदे विद्यते त्रयोदशाध्याये सप्तविंशतितमो मन्त्रः। सामवेदे (१३१, १४६३), तैत्तिरीयसंहितायां (४.२.९.३.), तैत्तिरीयारण्यके (१०.१०.२), शतपथब्राह्मणे (१४.९.३.११) मन्त्रोऽयं संप्राप्यते।

जीवने माधुर्यस्यातीव महत्त्वम्। सकारात्मकविचारैश्च जीवनं सुखमयं भवति। इयं मधुविद्या ब्राह्मणोपनिषद्विख्याता। पर्यावरणमहत्त्वं प्रतिपाद्यतेऽत्र। यतो हि व्यक्तिः समाजो वा स्वार्थं विहाय यथार्थं

सर्वसमाजकल्याणार्थमेव यदा यतते, तदा स नैसर्गिकशक्तीनां वायु- नदी- औषधीप्रभृतीनां केवलं यज्ञार्थमेव समुपयोगं करोति, नोपभोगं स्वार्थाय धनार्जनार्थं वा। तदा तासु सर्वासु शक्तिषु धारणा भवति- पर्यावरणरक्षणं भवति। अत एव ताः सर्वाः शक्तयो मधु क्षरन्ति, हानिकारिका न भवन्ति। माधुर्यगुणयुक्ता रसान्विताश्च भवति। वायु- जल- वनस्पत्यादि- नैसर्गिकोपयोग्यवस्तूनां स्वार्थप्रेरितमानवनिर्मित- प्रदूषणेनैवानेकाः समस्याः समुद्भवन्ति। यज्ञार्थं - समाजहितार्थं समुपयोगेन न। वल्लभाचार्यैरपि अधरं मधुरमित्यादिके मधुराष्टके भगवति तदव्याप्ते सर्वत्र जगति मधुरभावस्य दर्शनं कृतम्। व्यक्तिगते सामाजिके जीवने च अपामतीव महत्त्वम्। अत आप देवताः सर्वकल्याणकारिण्यो भवन्ति इति सिन्धुद्वीप ऋषिः ऋग्वेदे आपो देवतां स्तौति। यथा-

**आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।**
**महे रणाय चक्षसे।। ऋग्वेदः- १०/९/१**

ऋग्वेदे दशममण्डले नवमे सूक्ते प्रथमोऽयं मन्त्रः। शुक्ल यजुर्वेदेऽपि द्विवारम्-एकादशाध्याये पञ्चदशाध्याये पञ्चाशत्तमः षट्त्रिंशाध्याये चतुर्दशश्च मन्त्रः। तैत्तिरीयसंहितायां (४.१.५.१, ५.६.१.४, ७.४.१९.४), सामवेदे (१८३७), अर्थवेदे (१.५.१), तैत्तिरीयारण्यके (४.४२.४) च मन्त्रोऽयं प्राप्यते। अत एवातीव प्रसिद्धोऽयं मन्त्रः सर्ववेदश्रुतः।

ऋग्वेदस्य दशममण्डलस्य भिक्षुसूक्ते वा दानस्तुतिसूक्ते धनस्य अन्नस्य च दानं स्तूयते। भिक्षुर्नामाङ्गिरस ऋषिः दानमहिमा प्रतिपादयन् कथयति-

**मोघमन्नं विन्दते अप्रचेताः**
**सत्यं ब्रवीमि वध इत्स तस्य।**
**नार्यमणं पुष्यति नो सखायं**
**केवलाघो भवति केवलादी।।**

ऋग्वेदः - १०/११७/६

अप्रकृष्टज्ञानः व्यर्थमेव अन्नं लभते। तस्य पुरुषस्य वध एव। अर्यमादीन् देवान् हविष्प्रदानेन न पोषयति, समानव्यानमभ्यागतमतिथिं मित्रवर्गं च न पोषयति। केवलमसाक्षिकमन्नं भुञ्जानः सः केवलपापवान् भवति। अघमेव केवलं तस्य शिष्यते। नैहिकं नामुष्मिकमिति। तस्माद्यथाकथंचिद्दातव्य - मित्यभिप्रायः।

अस्मिन् एव सूक्ते पुरुषार्थस्य उद्यमस्य वा महत्त्वं प्रतिपादयन् ऋषिः निगदति -

**कृषन्नित्फाल आशितं कृणोति**
**यन्नध्वानमपवृङ्क्ते चरित्रैः।**
**वदन् ब्रह्मावदतो वनीयान्**
**पृणन्नापिरपृणन्तमभिष्यात्।।**

ऋग्वेदः - १०/११७/७

कृषिं कुर्वन् फालः कर्षकं भोक्तारं कृणोति। मार्गं गच्छन् पुरुषः आत्मीयैर्गमनैः स्वामिनो धनमावर्जयति। शास्त्रार्थं ब्रुवाणः ब्राह्मणः शास्त्रार्थमब्रुवाणाज्जनात् प्रियकरो भवति। दाता पुरुषः अदातारं जनम् अभिलक्ष्य बन्धुर्भवेत्।

शतायुप्राप्त्यर्थं ईशावास्योपनिषदा उत्तमं मार्गदर्शनं प्रदत्तम् अस्ति। तद्यथा -

**कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।**

**ईशावास्योपनिषद्-2**

ऐतरेयब्राह्मणे परिश्रमस्य माहात्म्यं प्रतिपादयता दर्शितमस्ति यत्-

**पुष्पिण्यौ चरतौ जङ्घे भूष्णुरात्मा फलेग्रहिः।**
**शेरेऽस्य सर्वे पाप्मानः श्रमेण प्रपथे हताः।।**
**आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।**
**शेते निपद्यमानस्य चरति चरतो भगः।।**
**चरन्वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।**
**सूर्यस्य पश्य श्रेयाणं यो न तन्द्रयते चरन्।।**

**ऐतरेय ब्राह्मणम्** - ७/३३/७

वैदिकऋषिभिः बहुजनहिताय बहुजनसुखाय च लौकिकोन्नतेः पारमार्थिकोन्नतेः च पथप्रदर्शनं कृतमस्ति। सम्पूर्णे वैदिकवाङ्मये प्रतिपादिता नैतिकता, आचारप्रवणता, कर्मशीलता, साम्मनस्यादेः शिक्षणं व्यक्तिं, समाजं, राष्ट्रं च सन्मार्गं प्रति उद्यमशीलं कुर्वन्ति।

**प्लॉट - १४३५ / सी १**
**सेक्टर - २ बी**
**गांधीनगरे, गुजरातराज्यम्**

---

# छन्दोबद्धगज़लकाव्यस्तबकः

❑ **डॉ. हर्षदेवमाधवः**

**( १ ) सर्वे ( उपजातिः )**

कामं कदम्बेषु वसन्ति सर्वे,
एकाकिनः किन्तु भवन्ति सर्वे।
प्रतिक्षणं प्रज्वलति श्मशानम्,
वह्नौ क्षणानां निवसन्ति सर्वे।
कथं वनं स्यान्मृतचेतनाभिः,
छिन्दन्ति शाखाश्च रुदन्ति सर्वे।
सत्यस्य मार्गे न जना द्विजिह्वाः,
सहस्रजिह्वा विचलन्ति सर्वे।।
मा गच्छ श्रोतुं वचनस्य सत्यम्,
विषं स्वकण्ठस्य वमन्ति सर्वे।
शुभं मुहूर्तं तु गतं गृहात् ते,
याता हि याता न मिलन्ति सर्वे।।
ज्ञातं न मूल्यं निजजीवनस्य।
भारं शरीरस्य वहन्ति सर्वे।।

**( २ ) नास्ति ( वसन्ततिलका )**

देहस्तु रिक्तसदने, सदने हि नास्ति।
रात्रिर्बहिस्तु प्रसृता, शयने हि नास्ति।।
वक्त्रं विलोक्य मुकुरे करवाणि किं भोः।
रागस्य दिव्यसुषमा वदने हि नास्ति।।
नो साहसं हि मनसो भवनाच्च गन्तुम्।
श्रद्धा प्रयाणसमये चरणे हि नास्ति।।
छन्दोऽक्षराणि गणितुं विफलः श्रमस्स्यात्।
यत्र ध्वनेर्मधुरता कवने हि नास्ति।।
गत्वापि किंनु करवाणि तदीयवीथीम्?
नाम्नो निजस्य स्मरणं वचने हि नास्ति।।

**- ८, राजतिलक बंगलोज़,**
**ममता हॉस्पिटल के सामने,**
**आबादनगर बस स्टॉपसमीप, बोपल,**
**अहमदाबाद-३८००५८**
**मो. ९४२७६ २४५१६, ७८७४५ ३२२२५**

# पाणिनीयशिक्षानुसारं ध्वनिप्रक्रियाज्ञानम्

❑ डॉ.जगदीशप्रसादजाटः

ध्वनिः व्यक्ताव्यक्तभेदेन द्विधा। व्यक्तरूपे तु वर्णानां प्रतीतिः, अव्यक्ते चाप्रतीतिः। विश्वस्य सर्वासु भाषासु ध्वनितत्त्वं विवेचितम्, तथापि यादृक् सूक्ष्मातिसूक्ष्मविवेचनं संस्कृतभाषायां विहितं न तदन्यत्रोपलभ्यते। पाणिनिना स्वीयशिक्षाग्रन्थे ध्वनिप्रक्रिया अवबोधिताः।

मानवः स्वमनसि जातान् विचारान् अभिव्यक्तं भाषयैव करोति, यतोहि भाषैवाभिव्यक्तेः अनन्यतमं साधनमस्ति इह लोके। अभिव्यक्तिश्च द्विधा मौखिकी लिखिता चेति। जगति प्रत्येकं भाषायां प्रतीकात्मकसंकेतानि भवन्ति,यैः तस्याः अवगमनं क्रियते।

एवं हि भाषायाः मौखिकत्वं तु 'ध्वनि' रित्यभिधीयते।

**आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।**
**मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्।।**
**( पा.शि.6 ,7 )**

पुनश्च वाण्याः भेदा उपकल्पिता चतुर्धा विद्वद्भिः, परापश्यन्तीमध्यमावैखरीभेदात्। उक्तञ्च परमलघु-मञ्जूषायां नागेशभट्टेन –

**परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।**
**वैखर्या हि कृतो नादः परश्रवणगोचरः।**
**मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।।**

इत्थं संस्कृतवाङ्मयस्य वैज्ञानिकरूपे वर्णितशिक्षाग्रन्थे भगवच्छिवकृतढक्कानिनादेन संगृहीतानां वर्णानां पाणिनिना संख्याप्रकाराः वर्णिताः–

**त्रिषष्टिश्चतुःषष्टिर्वा वर्णा शम्भुमते मताः।**
**प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा।।**
**( पा.शि. 3 )**

पुनश्च एष्वपि विभेदीकरणं कृतम् –

**स्वराः विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।**
**यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः।।**
**अनुस्वारो विसर्गश्च क पौ चापि पराश्रितौ।**
**दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च।।**
**( पा.शि.4-5 )**

अत्रापि पुनः पञ्चधा विभक्ताः –

**वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः।**
**स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः।।**
**( पा.शि.9-10 )**

अर्थात् परश्रवणगोचरवैखर्या नादस्य पञ्चविभागा विहिताः।तथा हि –

१. स्वरभेदः २. कालभेदः ३. आभ्यन्तरप्रयत्नभेदः ४. स्थानभेदः ५. बाह्यप्रयत्नभेदश्चेति।

यथाहि–

**उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः।**
**ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि।।**
**( पा.शि.-११ )**

स्थानभेदाच्चाष्टौ –

**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**
**जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च।।**

प्रयत्नाश्चाभ्यन्तरपञ्चधा ते च स्पृष्ट – ईषत्स्पृष्ट – विवृत – ईषद्विवृत – संवृतश्च। बाह्यश्चैकादशधा विवारसंवारश्वासनादघोषाघोषाल्पप्राणमहाप्राणोदात्तानुदा

त्तस्वरितभेदाच्च। अतः एषां ज्ञानं विना शुद्धोच्चारणमसम्भवमेव, तथाहि यावत्पर्यन्तं कस्या अपि भाषायाः शुद्धोच्चारणविषयकज्ञानं न भवति न तावत् साऽर्थबोधिका। अस्यैव महत्त्वं प्रतिपादयन्नाह भगवान् पतञ्जलिः 'एकः पूर्वपरयोः' इति सूत्रं महाभाष्ये - **एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति।** अन्यच्च व्याकरणस्य गौणप्रयोजनेषूक्तमेकं प्रयोजनं - दुष्टः शब्दः इति।

**दुष्टः शब्दः स्वरतो वर्णतो वा**
**मिथ्या प्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति**
**यथेन्द्रशत्रुः स्वरतोऽपराधात्।।**

श्लोकेऽस्मिन् एका वैदिकी कथा वर्णिता यत् याज्ञिकैः 'इन्द्रशत्रुर्वर्द्धस्व' इति मन्त्रेणाहुतयः प्रदत्ताः। अत्र उच्चारणे पूर्वपदप्रकृतिस्वरपठनाद् अन्यपदपदार्थप्रधानत्वाच्च बहुव्रीहिणा वृत्रासुरः स्वयमेव नष्टः।

अतः एतादृशनिखिलफलमूलकत्वात् वर्णोच्चारणं सावधानतया सम्यक्तया च विधातव्यमिति। अतः वर्णोच्चारणविधिरुपस्थाप्येतऽत्र-

**एवं वर्णाः प्रयोक्तव्याः नाव्यक्ता न च पीडिता।**
**सम्यक् वर्णप्रयोगेण ब्रह्मलोके महीयते।।३१।।**
**सुतीर्थादागतं व्यक्तं स्वाम्नायं सुव्यस्थितम्।**
**सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ।।५१।।**
**व्याघ्री यथा हरेत्पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।**
**भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्।।२५।।**

अर्थात् यथा व्याघ्री स्वपुत्रान् दंष्ट्राभ्यां नयति, न च पीडयति, तथैवास्माभिः ब्रह्मलोकावाप्तये व्यक्तरूपेण वर्णा उच्चारणीयाः। पाणिनिना अशुद्धोच्चारणस्य लक्षणान्यप्यवबोधितानि स्वीयशिक्षाग्रन्थे -

**उपांशुदष्टं त्वरितं निरस्तं,**
**विलम्बितं गद्गदितं प्रमीतम्।**
**निष्पीडितं ग्रस्तपदाक्षरं च**
**वदेन्न दीनं न तु सानुनास्यम्।। (पा.शि.-३५)**

शंकितं भीतिमुद्घृष्टमव्यक्तमनुनासिकम्।
काकस्वरं शिरसिगं तथा स्थानविवर्जितम्।।
(पा.शि.-३१)

याज्ञवल्क्यशिक्षायामपि उच्चारणदोषाः चतुर्दश वर्णिताः। एतदतिरिक्तं तत्रोच्चारणदोषेषु शारीरिकसंरचनात्मकदोषमुद्बोध्य कः शुद्धान् वर्णान् उच्चरिष्यतीति विषये आह-

**प्रकृतिर्यस्य कल्याणी दन्तौष्ठौ यस्य शोभनौ।**
**प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हसि।।**

उच्चारणदृष्ट्या पाणिनिना पाठकानामपि भेदद्वयं प्रकल्पितम् उत्तमाधमभेदेन -

**गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।।**
(पा.शि.३२)
**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थञ्च षडेते पाठकाः गुणाः।।**
(पा.शि.३३)

वस्तुतस्तु वर्णोत्पत्तिजनकस्तु भगवान् शिव एवास्ति तथाप्याधुनिकजगति लोकव्यवहाराय भगवता पाणिनिना प्रविभागोपविभागोपकल्पिता इति समर्थयन्नाह भर्तृहरिरपि -

**उपायाः शिक्षमाणानां बालानामुपलालनाः।**
**असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।**
(वा.प.२/२३८)

**एसोसिएट प्रोफेसर**
**स्व. लक्ष्मी कुमारी बधाला गर्ल्स पी.जी. कॉलेज,**
**गोविन्दगढ़, चौमूँ (जयपुरम्)**
**मो. 8209744180**

# अथ सेवा-समाचारो धर्मस्य संस्कृतस्य च

❑ पं. नथमलशास्त्री दाधीचः



इदं हि भगवदिच्छया भगवदाज्ञया भगवत्कृपया भगवत्कार्यमनुष्ठेयमिति विज्ञायाद्यतस्त्रिंशद्वर्षपूर्व- (वि.सं.२०४८) मेकस्मिन् श्रीमद्भागवतकथा ज्ञानयज्ञे सम्मिलितैर्विद्वद्भिरष्टोत्तरशत- (१०८) भागवताचार्यैर्विद्वद्गोष्ठीं समायोज्य सम्यग्विविच्य च **'अयं हि संस्कृतज्ञानां परो धर्मः कलौ युगे'** इति विनिश्चित्य राजस्थानस्य चूरूमण्डलान्तर्गते छापरनगरे (सुप्रथित-कृष्णमृगाभयारण्यस्थले) विशेषतो-'धर्मप्रचार-सिद्ध्यर्थंसेवायैसंस्कृतस्य च' अ.भा. भागवत-धर्मप्रचारपरिषदः स्थापना विहिता। तदानीं गौष्ठी-संयोजको विदुषां वशंवदोऽयं जनो भगवदाज्ञां मत्वा महामन्त्रि-पददायित्त्वं हृदा स्वीकृत्य परिषल्लक्ष्य-सिद्ध्यर्थं कृतसंकल्पः प्रमुमोद प्रवृत्तश्च सेवायामस्तु।

ततश्च संस्कृतसेवानुरागिणां समुदाचाराणां सत्पुरुषाणामर्थसौजन्येन विगतवर्षेषु जयपुर, सीकर, चूरू, रतनगढ़, डीडवाना, जसवन्तगढ़, लक्ष्मणगढ़, फतेहपुर, पुष्कर, बीकानेर, श्रीनिम्बार्कतीर्थ (सलेमाबाद), सालासरप्रभृतिस्थानेष्वध्ययनरतेभ्यः प्रवेशिकोपाध्यायशास्त्रिपरीक्षोत्तीर्णेभ्यो योग्यत-मच्छात्रेभ्यः प्रोत्साहनपुरस्कार त्वेनैकलक्षाधिक-मुद्रात्मकराशिः परिषदा प्रदत्तः। अनया संस्कृत-सेवा-योजनया शताधिक-संस्कृत-विद्यार्थिनः सभाजिताः प्रोत्साहिताश्च।

एवमेव भगवत्कृपा यत्र तत्र समीप वर्तिग्रामस्य पञ्चदशाधिकदेवालयेषु धर्मप्रचारसिद्ध्यर्थं गीताप्रेस-साहित्येन धार्मिकपुस्तकालय-व्यवस्थापुरःसरंसत्संग-प्रवचनकथाकीर्तनादिकार्यक्रमाः समारब्धाः। अनेन नित्यस्वाध्यायं-सेवा-कर्मणा तत्रत्याः शतशो ग्रामजनाः दुर्व्यसनमुक्ताः भूत्वा भगवद्भक्तौ संलग्नाः प्रत्यहं नामजयकीर्तनतत्पराश्च सञ्जाताः।

वर्षेऽस्मिन् भारतीपाठकाः सुधियः पं. श्रीबालकृष्णशास्त्रिणः सम्प्रति बैंगलोरनगरे निवसन्तो यज्ञानुष्ठानाचार्यत्वेन पाण्डित्ये प्रवृत्ताः सन्तो महामन्त्रिपद-दायित्वमङ्गीकृत्य सोत्साहं परिषत्कार्याय पण्डितान् प्रेरयन्ति।

एतत्सर्वं स्वधर्मनिष्ठात्मकं संस्कृत-सेवा-परं सामयिकं सत्कर्म सत्प्रेरणास्पदं प्रवर्तते विद्वद्भ्यो भारतीय- पाठकेभ्यश्च विशेषतः।

'जयतु संस्कृतम्'

**अध्यक्षः**

**अखिल भारतीय भागवत धर्म प्रचार परिषदः**

**छापर ( चूरू )**

---

त्रुटिसंशोधनम् :- नवम्बर, 2021 तमे अंके अष्टमे पृष्ठे श्रीगणेशाष्टकस्तोत्रे 'भजन भाव मयं' इति स्थाने 'भजत भावमयं' इति, 'प्रणवभक्त' इति स्थाने च 'प्रणतभक्त' इति पठनीयम्।

पुस्तक-समीक्षा

# 'हाइकु' काव्योपवनम्

❑ महामहोपाध्याय देवर्षि कलानाथ शास्त्री

प्राचीनतमायां संस्कृतभाषायां नवीनतमस्य, सुतरामभूतपूर्वस्य विस्मापकस्य सामूहिक-काव्यक्रीडा प्रयोगस्य ग्रन्थाकारे प्रकाशनं वीक्ष्य नूनं चकिता भवेयुः पाठकाः। प्रयोगोऽयं नवीनकाव्यरचनाप्रवीणेन कवि-वर्येण डॉ. हर्षदेव माधवेन विहितोऽस्ति यः हाइकु-सिजोतान्का प्रकृति-वैदेशिक (जापानीय) काव्यविधासु सर्जनाय सुविदितः। नवीनयुगे 'फेसबुक' नाम्ना नेटप्रणाल्या परस्परसंवादो विधीयते विश्वे। भारते संस्कृतसुधियोऽपि फेसबुकद्वारा संवदन्ति। एतदुपरि नूतनः प्रयोगो डॉ. हर्षदेवमाधवेनेत्थं कृतो यत् हाइकुविधायां संस्कृतरचना या तेन प्रसार्येत तदुपरि विविधभाषाविदः संस्कृतसुधियः स्वटिप्पणीं प्रेषयेयुः, तस्याः स्वभाषायामनुवादं वा कुर्युः। संवादेऽस्मिन् बहवः सुधियः (15-20) समवेताः।

मई-जूनमासयोः कोरोनामहामारीकाले हाइकूरचनानां योऽयं विमर्शः समजायत तस्य सङ्कलनं डॉ. हर्षदेवमाधवेन कृतं यद्धि सम्प्रति ग्रन्थाकारेऽपि प्रकाशमभजत्, अन्तर्जालविधयाऽपि प्रासार्यत। अष्टाविंशतितमे आधुनिककाव्यसंग्रहेस्मिन् प्रथमं डॉ. हर्षदेवमाधवस्य हाइकूकाव्यरचना मुद्रिताऽस्ति, तदनु विविधैः सुधीभिर्विविधासु भाषासु (हिन्दी-राजस्थानी-नेपाली-उड़िया-मराठी-बांग्ला-सिन्धी-फ्रेंच-इटैलियन-आंग्ली-प्राकृत-तेलेगु प्रभृतिषु) येऽनुवादाः, टिप्पण्यः, प्रतिक्रिया वा प्रकटिताः, तासां (यथोपलब्धं) सुधी-नामसहितं प्रकाशनमपि दृश्यते। प्रतिक्रिया इमाः सर्वा एव काव्यबद्धा न सन्ति, कतिपयाः काव्यबद्धाः कतिपयाः सूचनात्मिकाः। हाइकूकाव्यानां विषया अपि विविधाः। परिशिष्टे डॉ. माधवस्य 48 हाइकु रचनानां तेलुगुभाषानुवादोऽपि (डॉ. डी. एन. दीक्षितकृतो) मुद्रितोऽस्ति।

हाइकुकाव्यविधिः जापानत 'आयातिताऽस्ति' यस्यां केवलं सप्तदशाक्षरबद्धा काव्यरचना भवति। 'पञ्च-सप्त-पञ्च' इति विधानम्। एकश्चमत्कारी भावः सप्तदशाक्षरैः प्रकाश्यते। एवंविधानां माधवीय हाइकूरचनानां विविधसुधीविहितो विमर्शोऽयं नितान्तं नूतनः प्रयोगः। संग्रहस्य शीर्षमपि नूतनं चमत्कार-बद्धमस्ति। 'गगनवर्णानां गूहगवेषा' शीर्षके गूहगवेषापदं 'आँखमिचौली' अथवा 'लुकाछिपी' क्रीडावाचक-मस्ति। शीर्षकेण सह आङ्गलभाषायामिदमपि स्पष्टीकृतं यदयं संग्रहः कोरोनाकाले फेसबुकप्रणालीरचितानां काव्यकृतीनामस्ति- Facebook Poems of Corona Time। भारतस्य विभिन्नेभ्यः प्रान्तेभ्यः सुधीभिः प्रतिक्रियाः प्रकटिताः येषु डॉ. ताराशङ्कर पाण्डेय - डॉ. ओमप्रकाश पारीक - डॉ. प्रदीप पंड्या - डॉ. सुषमा सिंघवी - डॉ. कौशल तिवारी - डॉ. स्नेहलता शर्मा - डॉ. हरिसिंह राजपुरोहित प्रभृतयो राजस्थाने सुपरिचिताः।

भूमिकारूपेण विद्वन्मूर्धन्यस्य डॉ. राधावल्लभ

त्रिपाठिनोऽभिमतं हिन्द्यां प्रारम्भे मुद्रितमस्ति। प्रारम्भे प्रत्येकं हाइकुरचनया सहैकं श्वेतश्यामचित्रमपि चित्तप्रसादनाय मुद्रिमस्ति। सुतरां नूतनोऽयं प्रयोगो नूतना दिशः प्रदर्शयतीत्यभिनन्दामः कविवर्यं डॉ. हर्षदेव माधवम्।

**गगनवर्णानां गूहगवेषाः रचनाकारः डॉ. हर्षदेवमाधवः, प्रकाशक- संस्कृतिप्रकाशन, 103, नन्दनवन कॉम्प्लेक्स, मीठाखडीगाम, अहमदाबाद, पृ.सं. 162, मू. 125/-**

# शास्त्रपरिचायको ग्रन्थः

विश्वविद्यालयेभ्यो ग्रन्थानां प्रकाशनं सर्वत्र भवत्येव किन्तु साम्प्रतमेव सोमनाथसंस्कृतविश्वविद्यालयेन छात्राणां शिक्षार्थिनां च मार्गदर्शनाय संस्कृतवाङ्मये विद्यमानस्य वेद-पुराण-ज्योतिष-काव्यशास्त्रादिशास्त्रभाण्डागारस्य परिचायनाय शिक्षाप्रद एको ग्रन्थः अन्तर्जालविधया प्रसारित इति ज्ञात्वा प्रमोदेरन्, संस्कृतसेवकाः। 'शास्त्रपरिचायिका' शीर्षकवहोऽयं षट्सु भागेषु वेदविवरणम्, ज्योतिष-विवरणम्, व्याकरणविवरणम्, पुराणविवरणम्, सर्वदर्शनविवरणम्, साहित्यविवरणम् इति शीर्षकवहेषु शास्त्राणामेषां परिचयं सुस्पष्टरूपेण प्राञ्जलशैल्यां प्रश्नोत्तरविधया 256 पृष्ठेषु प्रस्तौति। तत्तद्विषयविशेषज्ञैः आचार्यैः प्रस्तुता इमे 6 अध्यायाः सम्यक् परिचाययेयुश्छात्रेभ्यः अन्येभ्यश्च जिज्ञासुभ्यः शास्त्राणामेषामितिहासं विषयवस्तुजातं च।

अध्यायेष्वेषु 'वेदानाम् उपवेदाः के ? किमस्ति वेदानां महत्त्वम्' इत्यादिशैल्यां प्रथमं संक्षिप्तः प्रश्न उपस्थापितः, तदनु तस्योत्तररूपेण विषयविवरणं प्रस्तुतम्। इत्थं विषयवस्तुपरिचयं कारयन्नयं ग्रन्थः संस्कृतवाङ्मयस्येतिहासं सरलया विधया परिचाययतीति नूतनोऽयं प्रकारो नूतनान् मार्गान् प्रबोधयति। ग्रन्थोऽयं पी.डी.एफ. (P.D.F.) विधया अन्तर्जालमाध्यमेन पठितुं शक्यते, मूल्यादिकं न सूचितमित्येस्येदमेव तात्पर्यं यद् भवतां चलदूरभाषे समाहितोऽयं ग्रन्थः। नवीनस्यास्य प्रयोगस्य स्वागतं निश्चितमेव विधीयेत संस्कृतसेविभिः। समग्रस्यास्य विधानस्य मार्गदर्शकः कुलपतिवर्यः प्रो. गोपबन्धु-मिश्रोऽस्ति, अध्यायानां लेखकाश्च डॉ. शत्रुघ्न पाणिग्रही, श्रीनित्यानन्द ओझा, डॉ. दीपेश विनोद कतिरा, डॉ. पङ्कज रावल, डॉ. जानकीशरण आचार्यः, डॉ. ललित पटेलः, जिगर एम. भट्टश्चेति सन्ति। डॉ. दीपेश कतिरा, डॉ. जानकीशरण आचार्यश्च सम्पादनं कृतवन्तौ। नाऽयं ग्रन्थोऽस्मभ्यं प्रेषितः। एतस्य परिज्ञानमस्माभिरन्तर्जालमाध्यमेन यथैव प्राप्तं, तदनु पाठकेभ्य एतस्य सूचनां प्रेषयितुमियं समीक्षा प्रस्तूयतेऽत्र।

**शास्त्रपरिचायिका (अन्तर्जालविधया प्रस्तुतो ग्रन्थः), प्रस्तोता- सोमनाथसंस्कृत-विश्वविद्यालयः, वेरावल, गुजरात, पृ.सं.256, मू.- पीडीएफविधया पठनम्**

# मासिकी शोधपत्रिका

स्वामिमहेश्वरानन्दसंचालितस्य विभिन्नेषु देशेषु शाखा: प्रसारयत: विश्वगुरुदीपाश्रमस्यैका शाखा जयपुरेऽपि स्थिताऽस्ति, मरुधरायामपि शाखा: सन्ति। जयपुरीये विश्वगुरुदीपाश्रमे प्राच्यविद्यानां शोधाय शोधसंस्थानमपि स्थापितमस्ति यस्मिन् वरिष्ठा: विद्वांस: पीठाध्यक्षरूपेणापि कार्यरता: सन्ति, समये-समये व्याख्यानान्यप्यायोज्यन्ते। शोधसंस्थानमिदं जयपुरस्थेन जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत- विश्वविद्याल-येनाऽपि सम्बद्धम्। अचिरमेव संस्थानेनानेन मासिक-शोधपत्रिकैका प्रकाशयितुमारब्धा यस्यां प्रमुखतो हिन्द्यां संस्कृते च शोधलेखा: प्रकाश्यन्ते।

अक्टूबरमासस्य (2021 ई.) 25/10 अङ्के विविधान् विषयान् विवेचयन्त: षड्लेखा: प्रकाशिता: सन्ति, 'पितृभ्य: स्वधा' लेख: संस्कृते पितॄणां विवेचनं कुरुते, डॉ. नारायणशास्त्रिकाङ्करस्य 'राष्ट्रोपनिषत्-प्रस्तावनाशतकं' राष्ट्रशिक्षाया: संस्कृतरूपान्तरणमस्ति यस्यैकांशोऽत्र मुद्रितो हिन्दीरूपान्तरेण, आङ्गलभाषानु-वादेन च साकम्। अन्ये लेखा हिन्द्यां सन्ति।

भाषावैविध्ययुतेयं शोधपत्रिका जयपुरात् प्रकाश्यमानानां पत्रिकाणां परिवारे वृद्धिं कुरुते इति हर्षावहम्।

**विश्वदीपदिव्यसन्देश (मासिकशोध-पत्रिका) प्रधानसम्पादक:- सोहनलालगर्ग, सम्पादक: डॉ. सुरेन्द्रकुमार शर्मा, प्रबन्धसम्पादक: महामण्डलेश्वर स्वामी ज्ञानेश्वरपुरी, प्रकाशक-विश्वगुरुदीप आश्रम शोधसंस्थान, कीर्तिनगर, श्यामनगर, सोडाला, जयपुर, वार्षिक-सदस्यता शुल्क 800/-**


## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 150/–, पंचवर्षीय शुल्क 700/–, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारतीयसंस्कृतप्रचारसंस्थान**

खाता संख्या – **2139101912498**

**IFS Code - CNRB0002139**

नारी-स्तम्भः

# सीतायाः निष्कासने शुकशापस्तत्र कारणम्

❑ डॉ. राजेश्वरी भट्ट

वाल्मीकिरामायणे वर्णितं, रावणवधानन्तरं लंका विजयिना रामेण सह अयोध्यां प्रत्यागतायां, अग्नौ परिपूतायाः प्रजाभिरभिनन्दितायाः शासनतन्त्रेण महाराज्ञीपदे प्रतिष्ठापिताया देव्याः सीताया एकस्य अन्त्यजस्य रजकस्य आक्षेपवचनैर्निष्कासनं रामराज्ये नारीणां शोचनीयां दशाम् उद्घाटयति। नार्युद्धारकस्य राज्ञो रामस्य विषये इदं सर्वथा श्रद्धेयं नास्ति। अस्य संदेहास्पदस्य अनुत्तरितस्य प्रश्नस्य समाधानं पद्मपुराणे द्रष्टव्यम्। ज्ञायते यत् मिथिलाधिपस्य जनकस्य कनीनिकेव रक्षिता पुत्री सीता कन्याभावे कदाचित् सखीभिः सह उद्याने रममाणाऽऽसीत्। तत्र तया सम्मुखे पर्वते स्थितं शुकयुगलं दृष्टम्। शुक आत्मनो मधुरया गिरया सीतारामयोः जन्म-रूप-नय-प्रज्ञा-पराक्रम उत्कृष्टशासनादीनां विषये इत्थं श्रावयन्नासीत् -

**रामोमहीपतिर्भूमौ भविष्यति मनोहरः**
**तस्य सीतेति नाम्ना तु भविष्यति महेलिका।।**
**स तया सह वर्षाणां सहस्राण्येक युग्दश।**
**राज्यं करिष्यते धीमान्कर्षन्भूमिपतीन्बली।।**
**धन्या सा जानकी देवी धन्योऽसौ रामसंज्ञितः।**
**यौ परस्परमापन्नौ पृथिव्यां रमते मुदा।।**

**प.पु. पा.खं 58 अ. 10, 11, 12**

शुकयुगलं आत्मनो विषये भाषमाणं ज्ञात्वा परमौत्सुक्येन भरिता सीता शुकयुग्मं ग्रहीतुं सख्यै न्यवेदयत्। महता प्रयत्नेन सखी शुकयुग्मं गृहीत्वा सीतायै समर्पितवती। ततः शुकयुग्मं शनैः शनैः आश्वासयन्ती सीता तमपृच्छत् यत् कौ युवाम् कुत आगतौ, को रामः, सीता च का, तयोर्विषये युवां कथं जानीथः। सीताया पृष्टेन शुकयुगलेन तत आत्मनो निवासभूमिः वाल्मीकि महर्षिणा कथाश्रवण, सीताया भाविजीवनादीनां विषये सर्व विस्तरेण एवं कथितम्-

**वाल्मीकिरास्ते सुमहानृषिर्धर्मविदुत्तमः।**
**आवां तदाश्रमस्थानौ सर्वदा सुमनोहरम्।।**
**स शिष्यान्गापयामास भाविरामायणं मुनिः।**
**प्रत्यहं तत्पदस्मारी सर्वभूतहिते रतः।।**
**तदावाभ्यां श्रुतं सर्व भाविरामायणं महत्**
**मुहुर्मुहुर्गीयमानमायातं परिपाठतः।।**

**प.पु. पा, खं 58, अ. 20, 21, 22**

एभिर्वचनैः सीतारामस्य भाविजीवनविषये ताभ्यां यत् ज्ञातं तत्सर्वं श्रावयित्वा शुकीशुकौ वनं प्रति गन्तुं प्रार्थयताम्। किन्तु रामस्य विषये अन्यत् किमपि ज्ञातुं बलवदुत्कण्ठितायाः सीताया हाव, भाव, व्यवहारेण च इयं नूनं सीतेत्यभिज्ञाय शुकी तस्याः पादयोः पपात अवदच्च-हे देवि। यस्य गुणवर्णने स्वयं ब्रह्माऽपि पारं न याति तस्य गुणानां कथने मादृशाः पक्षिणः कथं समर्था भविष्यन्ति-द्रष्टव्यम्

**एतद्रूपधरो रामो मया किं तु स वर्ण्यते।**

**शताननोऽपि नो याति पक्षिणः किमु मादृशाः।।**

**प.पु. पा.खं 58 अ 39 श्लो.**

वनं गन्तुं शुकयुगलेन भूयो भूयः प्रार्थ्यमानापि सीता कथमपि द्रविता न जाता। विशेषेण सा गर्भभारभरितायै भर्तुर्वियोगाशङ्कया भीतायै शुक्यै रामस्य मिथिलागमन-पर्यन्तं आत्मनः संरक्षणे स्थातुमादिशत्। सीतायाः कठोरव्यवहारेण दुःखाग्निना ज्वलन्ती आसन्नप्रसवा शुकी विस्फोटकैर्वचनैः सीतां एवं शशाप-

**यथा पतिना सार्धं वियोजयसि मामितः।**
**तथा त्वमपि रामेण विमुक्ता भव गर्भिणी।।**

**प.पु. पा.खं 58 अ 59 श्लो.**

इत्युक्तवती शुकी सद्यः प्राणान् त्यक्त्वा विमानेन स्वर्गता। ततो भार्यावियोगेनासंयतः सम्मूढः, क्रोधेन, दुःखेन च आतुरः शुकः प्रतीकारबुद्धया सीतायाः कृतेऽपि भर्तृवियोगं कामयमानः प्राणानत्यजत् आत्मनो दुर्गणैरन्यस्मिन् जन्मनि रजक-शरीरेण अयोध्यायां उत्पन्नो जातः रजकशरीरेण जातस्य शुकस्य मुखाद् निर्गतानि प्रसरितानि दुर्वचनान्येव सीतायाः कृते निष्कासनस्य कारणानि जातानि।

सहैव इदमपि ज्ञायते यत् जानताऽजानता वाऽपि विहितः कोऽपि अपराधः दण्डेन विना न शाम्यति।

**हिन्दी अनुवाद -**

वाल्मीकि रामायण में वर्णित, रावण के वध के पश्चात् लंका विजयी राम के साथ अयोध्या लौटी हुई, अग्निपरीक्षा से पवित्र, प्रजा द्वारा अभिनन्दित, शासनतन्त्र के द्वारा महारानी के पद पर सुप्रतिष्ठापित देवी सीता का एक अन्त्यज धोबी के आक्षेपयुक्त वचनों के कारण निष्कासन, रामराज्य में नारी की शोचनीय स्थिति का परिचायक है। रामराज्य के विषय में यह सर्वथा विश्वास के योग्य नहीं है इस संदेहास्पद अनुत्तरित प्रश्न का समाधान पद्मपुराण में उल्लेखित है। जिसके अनुसार मिथलानरेश जनक की आँख की पुतली के समान रक्षित पुत्री सीता, विवाह से पूर्व एक दिन अपनी सखियों के साथ उद्यान में विहार कर रही थी। वहाँ उसके सम्मुख पर्वत पर स्थित एक तोते का जोड़ा देखा। तोता अपनी मधुर वाणी में सीताराम के जन्म, रूप, प्रज्ञा, पराक्रम तथा उत्कृष्ट शासन व्यवस्था आदि के विषय में शुकी को इन शब्दों में सुना रहा था -

'पृथ्वी पर राम नाम के एक सुन्दर राजा होंगे। उनकी सीता नाम की महारानी होंगी। रामचन्द्र जी बहुत बुद्धिमान एवं बलवान होंगे तथा समस्त राजाओं को अपने वश में रखते हुए सीता के साथ ग्यारह हजार वर्षों तक राज्य करेंगे। धन्य हैं जानकी देवी और धन्य हैं राम जो एक दूसरे को प्राप्त होकर इस पृथ्वी पर आनन्दपूर्वक विहार करेंगे।

शुकयुगल को अपने विषय में परस्पर वार्तालाप करते हुए जानकर अत्यन्त उत्सुकता से भरकर सीता ने

अपनी सखी से तोते के जोड़े को पकड़ने का निवेदन किया। अत्यन्त परिश्रम एवं प्रयास से सखी ने तोते के जोड़े को पकड़कर सीता को दे दिया। शुकयुग्म को धीरे-धीरे आश्वस्त करती हुई सीता ने उससे पूछा- 'तुम दोनों कौन हो ? कहाँ से आये हो ? राम कौन हैं तथा सीता कौन है ? उन दोनों के विषय में तुम दोनों कैसे जानते हो ?' सीता के द्वारा इन प्रश्नों के उत्तर पूछे जाने पर शुक युगल ने अपनी निवासभूमि, वाल्मीकि महर्षि द्वारा कथा श्रवण, सीताराम के भावी जीवन आदि के विषय में विस्तार से इस प्रकार कहा -

देवि ! वाल्मीकि नाम से प्रसिद्ध एक बहुत महान महर्षि हैं जो धर्मज्ञों में श्रेष्ठ हैं। हम दोनों उन्हीं के आश्रम में रहते हैं। महर्षि ने रामायण नाम का एक ग्रन्थ बनाया है जो सदा ही सबको प्रिय जान पड़ता है उन्होंने शिष्यों को उस रामायण का अध्ययन करवाया है तथा वे प्रतिदिन प्राणियों के हित में संलग्न रहते हैं। हम लोगों ने उसे पूरा पूरा सुना है। बारम्बार उसका गान और पाठ सुनने से हमें भी उसका अभ्यास हो गया है।

इन वचनों से सीता और राम के भावी जीवन के विषय में शुकयुगल को जो कुछ भी ज्ञात था वह सब सीता को सुनाकर शुक और शुकी ने पुन: वन की ओर जाने की प्रार्थना की, किन्तु राम के विषय में अन्य कुछ जानने को उत्सुक सीता के हाव, भाव एवं व्यवहार से, यह सीता ही है, इस आशय से शुकी सीता के चरणों में गिर गई। और कहा- 'हे देवि जिसके गुणों का वर्णन करने में साक्षात् ब्रह्मा जी भी समर्थ नहीं है तब हम जैसे पक्षी कैसे पार पा सकते हैं। किन्तु शुकयुगल के द्वारा बार-बार प्रार्थना किए जाने पर भी सीता तनिक भी द्रवित नहीं हुई। विशेषरूप से उसने गर्भभार से शिथिल एवं पति के वियोग की आशंका से भयभीता शुकी को राम के मिथिला आने की अवधि तक यहीं रहने का आदेश दिया। सीता के कठोर व्यवहार के कारण दु:खाग्नि से जलती हुई आसन्नप्रसवा शुकी ने विस्फोटक वचनों से सीता को शाप देते हुए कहा- 'हे सीता ! जिस प्रकार तू मुझे अपने पति से विलग कर रही है वैसे ही तुझे भी गर्भिणी अवस्था में पति से विलग होना पड़ेगा।' यों कहकर पतिवियोग में शोक के कारण शुकी के प्राण निकल गये एवं शीघ्र ही वह विमान से स्वर्ग चली गई।

भार्या के वियोग से असंयत, सम्मूढ़ तथा क्रोध से व्याकुल शुक ने भी प्रतिकार बुद्धि से सीता के लिए भी पति-वियोग की कामना करते हुए प्राण त्याग दिये और अपने क्रोधादि दुर्गुणों के कारण पुन: धोबी के रूप में अयोध्या में जन्म ग्रहण किया। धोबी के रूप में उत्पन्न शुक के मुख से निकले हुए दुर्वचन ही सीता के निष्कासन का कारण बने।

इससे यह भी ज्ञात होता है कि जाने-अनजाने में किया हुआ अपराध दण्ड के बिना समाप्त नहीं होता।

**पूर्व संस्कृतविभागाध्यक्षा,**
**लालबहादुरशास्त्रीकॉलेज,**
**तिलकनगरम्, जयपुरम्**

आयुर्वेद-स्तम्भः

# कल्याशोऽनुभवेच्छ्रेष्ठः

❑ डॉ. प्रो. बनवारीलालगौड़ः
पूर्व-कुलपतिः

**हेमन्तशिशिरौ शीतात्मकावृतू स्तः। तत्र ह्यव्याहतबलः सोमः स्वाभिः शिशिराभिर्भाभिरापूरयञ्जगदाप्याययति शश्वत्, तेन हि शीते शीतानिलस्पर्शसंरुद्धो बलिनां बली पक्ता हेमन्ते शिशिरे च मात्राद्रव्यगुरुक्षमो भवति। सो हि प्रबलः पक्ता यदा युक्तमिन्धनं न लभते तदा स देहजं रसं हिनस्ति, तेन हि धातुक्षयो भवति, धातुक्षयाच्च शीतो वायुः शीते प्रकुप्यति। 'यतो हि वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन च, इति सैद्धांतिकरूपेण निर्दिशत्याचार्यश्चरकः। तस्माद्धेमन्ते शिशिरे तु स्निग्धाम्ललवणान् रसान् सम्यक्तया प्रयोजयेत्। सामान्यो ह्ययं नियमः यदृतुसात्म्यमपेक्ष्य कृतेनाहारेणैव भवति सम्यक् पोषणम्। तेन ऋतुप्रविभागपूर्वकमृतुसात्म्यमवलोक्यैव भोजनङ्करणीयं सर्वेष्वृतुषु।**

हेमन्त एवं शिशिर ये दो ऋतुएं शीत स्वरूप की हैं। इनमें जिसका बल बाधित नहीं है ऐसा चन्द्रमा अपनी शीतल किरणों से जगत् का निरन्तर आप्यायन (संतर्पण) करता है। निश्चित रूप से इससे शीतकाल में शीत वायु के स्पर्श से बलवान् व्यक्तियों की रुकी हुई बलवान् जठराग्नि हेमन्त ऋतु में एवं शिशिर ऋतु में मात्रा एवं द्रव्य सम्बन्धी गुरुत्व को सहन करने वाली होती है। वह प्रबल जठराग्नि जब उपयुक्त इन्धन को प्राप्त नहीं करती है तो वह शरीर में उत्पन्न होने वाले रस धातु को नष्ट करती है, इससे धातुक्षय होता है और धातुक्षय से शीतकाल में शीत वायु प्रकुपित होती है। आचार्य चरक सैद्धांतिक रूप से निर्देश करते हैं कि 'क्योंकि निश्चित ही धातुक्षय से एवं मार्ग के आवरण से वायु का प्रकोप होता है।' इसलिए हेमन्त और शिशिर ऋतु में स्निग्ध, अम्ल एवं लवण रसों को ठीक प्रकार से प्रयुक्त करना चाहिए। यह सामान्य नियम है कि ऋतु के सात्म्य की अपेक्षा करके किए गए आहार से ही सम्यक् पोषण होता है, इससे ऋतु का सम्यक् विभाग करते हुए सभी ऋतुओं के अनुरूप ही ऋतुसात्म्य को ध्यान में रखकर ही भोजन करना चाहिए ।

**ऋतुसात्म्यमधिकृत्याशिताद्यादाहाराद्बलं
वर्णश्च वर्धते।
येन हि जनेन चेष्टाहारव्यपाश्रयम् तु सात्म्यं विदितं
स सर्वदा स्वस्थः सुखी च भवति।।
अत्र शीतर्तुमधिकृत्य सम्यक्ज्ञानपूर्वकमृतु-
सात्म्यानुरूपं प्रातराशानुष्ठानं प्रस्तौमि।।**

ऋतुसात्म्य को ध्यान में रखकर अशित इत्यादि (अशित, पीत, लीढ एवं खादित) आहार से बल एवं वर्ण बढ़ता है। जिस व्यक्ति के द्वारा चेष्टा (विहार) एवं आहार के आश्रयस्वरूप सात्म्य को जान लिया गया है वह व्यक्ति सर्वदा स्वस्थ एवं सुखी होता है । यहाँ शीत ऋतु को ध्यान में रखकर सम्यक् ज्ञानपूर्वक ऋतुसात्म्य के अनुरूप प्रातःकालीन भोजन के अनुष्ठान (कार्यनिष्पादन) को प्रस्तुत कर रहा हूँ।

**कल्यः (नीरोगः) अनन्यव्यापार-**

**त्वेनाध्ययनाय कृतकालपरिग्रहः( कृतक्षणः ) प्रातरुत्थायोपव्यूषं ( किञ्चिच्छेषायां रात्रौ ) वोत्थाय कृत्वाऽऽवश्यकमुपस्पृश्योदकं चङ्क्रमणव्यायामाभ्यङ्गोद्वर्तनस्नान-निर्मलाम्बरधारणादीन् विधाय देवर्षिगोब्राह्मण-गुरुवृद्धसिद्धाचार्येभ्यो नमस्कृत्य देवार्चनं कृत्वा समे शुचौ देशे सुखोपविष्टो ( एकाग्रमनः-प्रणीताभिः ) मनःपुरःसराभिर्वाग्भिः-सूत्रमनुक्रामन् पुनः पुनरावर्तयेदभ्यस्येच्च शास्त्रमथवा चङ्क्रमणं व्यायामञ्च कृत्वा यथाधिकारं यथाविधि यथाशक्ति च यमनियमासनप्राणायामप्रत्याहारधारणाध्यान-समाधिस्वरूपात्मकस्याष्टांगयोगस्याभ्यासो विधेयः । तत्पश्चादभ्यङ्गोद्वर्तनस्नानादिक्रमो विधेयः ।**

स्वस्थ व्यक्ति सभी कार्यों से विरत होकर मात्र पढ़ने के संकल्प वाला ( कृतक्षणः ) प्रातःकाल उठकर के या कुछ रात्रि के शेष रहने पर उठकर आवश्यक शौचनिवृत्ति आदि क्रियाओं से निवृत्त होकर आचमन करके चङ्क्रमण (घूमना), व्यायाम-अभ्यङ्ग-उद्वर्तन-स्नान-निर्मलाम्बरधारणादि को करके, देव-ऋषि- गो-ब्राह्मण- गुरु-सिद्ध और आचार्यों को प्रणाम करके, देवार्चन करके, समतल पवित्र स्थान पर सुखपूर्वक बैठकर (एकाग्र मन से किए गए) मन को आगे करके उच्चारित किए गए वचनों से (भली प्रकार से अर्थतत्त्व को जानकर, गूढ़ अर्थ को समझकर) सूत्रों की यथाक्रम बार-बार आवृत्ति करे (दोहरावे) और शास्त्र का अभ्यास करे अथवा चङ्क्रमण (भ्रमण, घूमना) और व्यायाम करके प्रमाण के अनुरूप यथाविधि एवं स्वयं की शक्ति को ध्यान में रखकर यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिस्वरूपात्मक अष्टाङ्गयोग का अभ्यास करे । उसके बाद अभ्यङ्ग, उद्वर्तन और स्नानादि के क्रम को करना चाहिए ।

**तदनन्तरमेव प्राणकामः कल्यः ( नीरोगः ) जनः कल्यवर्तं ( तुच्छम् अपथ्यं वा ) भोज्यं विहाय शीतर्तौ कल्ये ( प्रभाते ) श्रेष्ठौषधिभिः सुसंस्कृतेन अथवा सामान्येन कृतान्नेन विहितं कल्यवर्तम् ( कल्याशम् ) अनुभवेत् । अनेन हि स्वास्थ्यानुवर्तनं भवति, प्रसङ्गेऽस्मिन्नाचार्यश्चरकः कथयति, यत्-**

**तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते।**
**अजातानां विकाराणामनुत्पत्तिकरं च यत्।। च.सू. ५/१३।।**

**यो हि सुष्ठु निर्विकारत्वेनावतिष्ठते स एव स्वस्थः । स्वस्थे हि जने श्रेयस्करता प्रतिष्ठिता, यच्चोक्तं महाभारतेऽपि-**

**यावदेव भवेत् कल्यः तावच्छ्रेयः समाचरेत् ।**

उसके बाद ही प्राणों की रक्षा की इच्छा करने वाला स्वस्थ व्यक्ति कल्यवर्त (तुच्छ अथवा अपथ्य) भोज्य पदार्थ को छोड़कर शीत ऋतु में प्रातःकाल (प्रभात के समय) में श्रेष्ठ औषधियों से सुसंस्कृत अथवा सामान्य कृतान्न से तैयार कलेवा (प्रातःकालीन भोजन) का प्रयोग करे। इससे निश्चित रूप से स्वास्थ्य का अनुवर्तन होता है। इस प्रसङ्ग में आचार्य चरक कहते हैं कि-

उसका नित्य प्रयोग करना चाहिए जिससे कि स्वास्थ्य का अनुवर्तन हो (स्वास्थ्य यथावत् बना रहे ) और जो रोग उत्पन्न नहीं हुए हैं वे उत्पन्न नहीं हो जाएं ऐसे रोगों की उत्पत्ति को नहीं करने वाले का प्रयोग करे। जो

ठीक तरह से अर्थात् विकाररहित होकर रहता है वही स्वस्थ है। स्वस्थ व्यक्ति में ही कल्याणकरत्व प्रतिष्ठित (व्यवस्थित) है , जोकि महाभारत में भी कहा गया है-

जब तक व्यक्ति स्वस्थ रहे तब तक कल्याणकारी कार्य का आचरण करता रहे ।

**सर्वहितकरमचिन्त्याद्भुतप्रभावमायुष्यमारोग्यकरं वयसः स्थापनं, निद्रातन्द्राश्रमक्लमालस्यदौर्बल्यापहरमनिलकफ-पित्तसाम्यकरं स्थैर्यकरमबद्धमांसहरमन्तरग्निसन्धुक्षणं प्रभावर्णस्वरोत्तमकरं त्रिकालं द्विकालं वा भोजनं शीते विधेयम्। अनेन हि सर्वेऽपि सामान्याः जनाः पुनर्युवत्वमाप्नुवन्त्यधिकेषु कार्येषु चेष्टतमाः स्थिरसमसुविभक्तमांसाः, सुसंहतस्थिरशरीराः, सुप्रसन्नबलवर्णेन्द्रियाः, सर्वत्राप्रतिहतपराक्रमाः, क्लेशसहाश्च भवन्ति।**

सबके लिए हितकर अचिंत्य एवं अद्भुत प्रभाव वाले आयुष्य (आयु के लिए हितकर) और आरोग्य को करने वाले तथा वय:स्थापन (युवावस्था को चिरकाल तक बनाए रखने वाले), निद्रा-तन्द्रा-श्रम-क्लम-आलस्य-दौर्बल्य का अपहरण करने वाले, अनिल-कफ-पित्त को सम स्वरूप में करने वाले , स्थिरता करने वाले, अबद्ध मांस का हरण करने वाले अर्थात् मांसपेशियों की शिथिलता को दूर करने वाले , अग्नि को सन्धुक्षित करने वाले (प्रज्वलित करने वाले, बढ़ाने वाले), प्रभा-वर्ण और स्वर को उत्तम स्वरूप में करने वाले तीन काल वाले अथवा 2 कालवाले भोजन को शीतकाल में करना चाहिए। इससे ही निश्चित रूप से सभी सामान्य जन पुनः युवावस्था को प्राप्त करते हैं और अधिक कार्यों को करने में चेष्टावाले होते हैं, स्थिर-सम (समान) अंगों वाले तथा सुविभक्त मांस पेशियों वाले सुसंगठित तथा स्थिर शरीर वाले, सुप्रसन्न (श्रेष्ठ) बल, वर्ण और इन्द्रियों वाले, सर्वत्र सभी कार्यों को करने में अवरुद्ध नहीं होती है गति जिनकी ऐसे पराक्रम वाले, सभी प्रकार के कष्टों को सहन करने वाले हो जाते हैं ।

**आचार्यश्चरकः निर्दिशति यत्-**

**सर्वे शारीरदोषा भवन्ति ग्राम्याहारादम्ललवणकटुकक्षारशुष्कशाकमांसतिलपललपिष्टान्नभोजिनां विरूढनवशूकशमीधान्यविरुद्धासात्म्यरूक्षक्षाराभिष्यन्दिभोजिनां क्लिन्नगुरुपूतिपर्युषितभोजिनां विषमाध्यशनप्रायाणां दिवास्वप्नस्त्रीमद्यनित्यानां विषमातिमात्रव्यायामसङ्क्षोभितशरीराणां भयक्रोधशोकलोभमोहायासबहुलानाम्;**

**अतोनिमित्तं हि शिथिलीभवन्ति मांसानि, विमुच्यन्ते सन्धयः, विदह्यते रक्तं, विष्यन्दते चानल्पं मेदः, न सन्धीयतेऽस्थिषु मज्जा, शुक्रं न प्रवर्तते, क्षयमुपैत्योजः; स एवम्भूतो ग्लायति, सीदति, निद्रातन्द्रालस्यसमन्वितो निरुत्साहः श्वसिति, असमर्थश्चेष्टानां शारीरमानसीनां, नष्टस्मृतिबुद्धिच्छायो रोगाणामधिष्ठानभूतो न सर्वमायुरवाप्नोति।**

**तस्मादेतान् दोषानवेक्षमाणः सर्वान् यथोक्तानहितानपास्याहारविहारान् रसायनानि प्रयोक्तुमर्हतीति......77( च.चि.1/2/3 )**

आचार्य चरक कहते हैं कि-

सभी शारीरिक दोष ग्राम्य आहार से होते हैं तथा

अम्ल-लवण-कटुरसप्रधान द्रव्य, क्षार, शुष्क शाक, शुष्क मांस, तिल, पलल (तिल का कल्क), पिष्टान्न (पीठी द्वारा बने हुए आहार-द्रव्य) इनका सेवन करने वालों के तथा विरूढ (अंकुरित धान्य), नवीन शूक एवं शमी धान्य, विरुद्ध आहार, असात्म्य भोजन, रूक्ष एवं क्षार प्रधान तथा अभिष्यन्दी भोजन करने वालों के, क्लिन्न (सड़े गले), गुरु दुर्गन्धित एवं बासी पदार्थ खाने वालों के तथा प्राय: विषमाशन (विषम भोजन) करने वालों के एवं अध्यशन करने वालों के (पहले किए गए भोजन के न पचने पर भी पुन: भोजन करना अध्यशन कहलाता है), प्रतिदिन दिन में सोने वालों के, नित्य मैथुन करने वालों के, नित्य मद्यपान करने वालों के, विषम या अति मात्रा में व्यायाम से पीड़ित शरीर वालों के तथा भय-क्रोध-शोक-लोभ-मोह एवं श्रम अधिक करने वालों के सभी शरीरदोष (विकार, रोग) होते हैं ।

इन कारणों के सेवन करने से मांस शिथिल हो जाता है, सन्धियाँ अपने स्थान से हट जाती हैं, रक्त में विदाह हो जाता है, मेदो धातु अति मात्रा में स्त्रवित होने लगता है, अस्थियों में मज्जा का संधान नहीं हो पाता है, शुक्र की प्रवृत्ति नहीं हो पाती, ओजस् का क्षय हो जाता है, इस प्रकार के लक्षणों के हो जाने पर वह ग्लानियुक्त (हर्षक्षय वाला) हो जाता है । उसका शरीर शिथिल हो जाता है। निद्रा, तंद्रा एवं आलस्य से युक्त वह व्यक्ति उत्साहहीन होकर श्वास लेता है, वह शारीरिक एवं मानसिक कार्यों को (चेष्टाओं को) करने में असमर्थ हो जाता है और नष्ट हो गई है स्मरण शक्ति जिसकी तथा बुद्धि एवं छाया जिसकी नष्ट हो गई हो ऐसा रोगों का अधिष्ठानभूत वह पूर्ण आयु को प्राप्त नहीं कर पाता है।

**अत एव भिषङ्निर्देशेन रसायनानां वाजीकरणानाञ्च द्रव्याणां सेवनङ्करणीयम् ।**

**भारतवर्षे तु शीततौ परम्परया सुपौष्टिकानां सुसंस्कृतानां विशिष्टानामाहारद्रव्याणां प्रयोगङ्कुर्वन्ति जना:, विशेषेण तु कल्यवर्तात्मके प्रातराशे। कथयन्त्यपि हि जना: यत्-कल्याशोऽनुभवेच्छ्रेष्ठः।**

**प्रसङ्गेऽस्मिन् विश्लेषणीयमेतद्वर्तते यत्श्रेष्ठ इत्यस्य भावार्थो वर्तते ह्येषः यत् सुपौष्टिकस्तु भवेदेषः किन्तु मात्रया न भवेदधिक:। जनेषु प्रचलिता ह्येकोक्तिः यत्प्रात:कालीनं भोजनं राजवत्करणीयम् । इमामुक्तिं पुरस्कृत्य कथयन्ति केचिज्जना: यत् कल्यवर्त: सुपौष्टिक: गरिष्ठः प्रचुरश्च भवेदिति, किन्तु नैतदुचितम्, कल्यवर्तस्तु सुपौष्टिक: गरिष्ठस्तु भवेदेव किन्तु सुपाच्योऽपि भवेदिति परमावश्यक:। प्रातराशस्तु जठराग्न्यवरोधक: न भवेदिति परमावश्यक:।**

इसलिए वैद्य के निर्देश से रसायन एवं वाजीकरण शब्दों का तथा श्रेष्ठ आहार का सेवन करना चाहिए। भारतवर्ष में तो शीत ऋतु में परंपरा से अत्यधिक पौष्टिक, अच्छी प्रकार से संस्कारित किए हुए विशिष्ट आहार-द्रव्यों का लोग प्रयोग करते हैं, विशेष रूप से तो कलेवारूपी प्रात:कालीन भोजन में। लोग कहते भी हैं कि कलेवा श्रेष्ठ किया जाना चाहिए ।

इस प्रसङ्ग में यह विश्लेषण करने योग्य है कि 'श्रेष्ठ' इसका भावार्थ यह है कि अच्छी प्रकार से पौष्टिक यह

होना चाहिए किंतु मात्रा में अधिक नहीं होना चाहिए। लोगों में यह एक उक्ति प्रचलित है कि 'प्रात:कालीन भोजन राजा की तरह' करना चाहिए । इसी को ध्यान में रखकर कुछ लोग कहते हैं कि कलेवा पौष्टिक, गरिष्ठ और अत्यधिक होना चाहिए, लेकिन यह उचित नहीं है। कलेवा तो (प्रात:कालीन भोजन तो) अत्यधिक पौष्टिक और गरिष्ठ तो होना चाहिए किंतु वह सुपाच्य भी हो, यह परमावश्यक है। प्रात: कालीन कलेवा जठराग्नि का अवरोध करनेवाला नहीं होना चाहिए, यह परमावश्यक है।

**च्यवनप्राशस्य प्रयोगप्रसङ्गे कथयत्याचार्यः-**

**अस्य मात्रां प्रयुञ्जीत योपरुन्ध्यान्न भोजनम् (च.चि.1/1/72)।**

**एषः सैद्धान्तिकः सङ्केतो वर्तते सर्वेषां प्रातःकाले प्रयोज्यानां गरिष्ठानामवलेहपाकादीनां सुसंस्कृतानामन्नानाञ्च प्रातःकाले प्रयोगयोग्यानां कल्यवर्तात्मकानामाहारद्रव्याणाणञ्च कृतेऽपि ।**

च्यवनप्राश के प्रयोग के प्रसङ्ग में आचार्य कहते हैं कि इसकी वह मात्रा प्रयुक्त करनी चाहिए जो कि भोजन का उपरोध न करे अर्थात् इसके बाद में किए जाने वाले भोजन में बाधा उपस्थित नहीं करे ( उस काल तक पूर्णरूपेण पच जाए)। यह सैद्धांतिक संकेत है सभी प्रात: काल में प्रयुक्त किए जाने वाले गरिष्ठ अवलेह-पाक इत्यादि एवं अच्छी प्रकार से संस्कृत (संस्कारित किए गए) आहार-द्रव्यों के लिए तथा प्रात: काल में प्रयोग के योग्य कलेवा के लिए उपयुक्त आहार-द्रव्यों के लिए भी यह सैद्धान्तिक संकेत है ।

**शीततौ परम्परया प्रचलितानां प्रसिद्धानां बब्बूलनिर्यासमोदकानां, मेथीमोदकानां, हरिद्रामोदकानां, शुण्ठीमोदकानाञ्च प्रयोगो भवति विशेषेण तथा च च्यवनप्राश-ब्राह्मरसायन-मुसलीपाक- अश्वगंधापाक- कपिकच्छुपाकेत्यादीनां प्रयोगं कुर्वंति जनाः स्वेच्छया वैद्यनिर्देशेन वा, किन्त्वत्रावधेयमस्त्येतद्यत् सुपौष्टिकाः सुसंस्कृता अप्येते सुपाच्याः न भवन्ति गरिष्ठत्वात्, अतएव जठराग्निमपेक्ष्यैवैतेषामल्पमात्रायामेव प्रयोगो विधेयः, अस्मात् कारणात् कथनीयमनुकरणीयश्चैतद्वर्तते वचनम्, यत् 'कल्याशोऽनुभवेच्छ्रेष्ठः'।**

शीत ऋतु में परम्परा से प्रचलित प्रसिद्ध गोंद के लड्डुओं का, मेथी के लड्डुओं का, हल्दी के लड्डुओं का और सोंठ के लड्डुओं इत्यादि का प्रयोग विशेष रूप से होता है और लोग अपनी इच्छा से अथवा वैद्य के निर्देश से च्यवनप्राश- ब्राह्मरसायन-मुसलीपाक-अश्वगंधापाक-कपिकच्छुपाक इत्यादि करते हैं, किंतु यहाँ यह ध्यान देने योग्य है कि अच्छी प्रकार से पौष्टिक और ठीक ढंग से संस्कारित किए गए भी ये गरिष्ठ होने के कारण सुपाच्य नहीं होते हैं, इसलिए जठराग्नि को ध्यान में रखकर इनका अल्प मात्रा में ही प्रयोग करना चाहिए । इस कारण से यह कहने योग्य और अनुकरण करने योग्य वचन है कि 'कलेवा श्रेष्ठ करना चाहिए'।

**पूर्व-कुलपतिः ( म.म.राष्ट्रपति-सम्मानितः )**
**डॉ. एस. राधाकृष्णन् राजस्थान आयुर्वेद**
**विश्वविद्यालयः, जोधपुरम्**

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनों सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

## एस्बेस्टोस सीमेन्ट शीट्स

## छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाडा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

# राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites : www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/-पाञ्चजन्य • 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली-110055
फोन : 011-47642000, 01, 02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७९०१४

प्रतिष्ठायाम्,